श्री जगदम्बायै नमः

अथ छन्दोगानां उपनयन पद्धतिः

महामहत्तक सठक्कुर वीरेश्वर विरचिता

पण्डितवर-चिरञ्जीवशर्म्मणा मैथिलेन शोधिता टिप्पण्याऽलङ्कृता च ।

प्रकाशक—कन्हैयालाल कृष्णदास, "श्रीरमेश्वर" प्रेस, दरभंगा.

* ओं नमो विष्णवे नमः *



अथ पद्धतिबहिर्भूतमप्याचारपरिप्राप्तं चूडाकरण पूर्व्वनिशायां जूटिकाबन्धनम् । त्रिः सहस्रशीर्षेत्यादि षोड़शर्चम्पठित्वा त्रिश्वेतशल्लकी [१] कण्टकेन शिखायां भागत्रयं कृत्वाऽऽचार्य्यो माणवकस्य जूटिकां बध्नीयात् । ततो माणवकस्य स्कन्धदेशादारभ्य चन्दनेन यज्ञोपवीताकारेण वेष्टयेत् ॥ (अत्रैव, ओं आमन्त्रये त्वां जूटिके कुमार शिरसंस्थिते । प्रभाते छेदनार्थाय कुमारस्य शुभाय च ॥ ओं स्वस्त यज्ञोपवीते दास्यामि । ओं श्वस्ते वपामि, इत्यपि बहवः कथयन्तीति ॥) अथ माणवकपितुराचार्य्यत्वे वरणं नास्ति तद्भिन्नस्याचार्य्यत्वे वरणमावश्यकमेव तच्चोपनयनदिने मातृकापूजातः प्रागेव माणवकेन कर्त्तव्यम् । वरणसम्भृतिमादाय नमोद्यामुकमासीयामकपक्षीयामुकतिथावमुकगोत्रस्य मम श्रीअमुककुमारस्य [२] चूड़ाकरणोप-

[१] शल्लकी भाषाया 'शाहा' इति प्रसिद्धः ।

[२] यद्यास्मन्नेवादने गृह्यक्तप्रकारेण नामकरण पि क्रियते तदा सङ्कल्पवाक्य "मम श्री अमुक कुमारस्य" इति पदस्यानन्तरम् "नामकरण चूड़ाकरणेत्यादि" योजनीयम् ।

१-ओं आमन्त्रितासि भद्रे त्वं चूड़ाकरणकर्मणि । अस्य श्रीतिं प्रपद्यस्व सर्वकामार्थ सिद्धये ॥
२-ओं जूटिके त्वामामन्त्रयिष्यामि चूड़ाकरणकर्मणि । अतस्त्वा मुञ्च याम्यहं सर्वकाम प्रसिद्धये ॥

नयनसमावित्र चरुहोमसमावर्त्तनकर्म्मकर्त्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचन्दन ताम्बूलपूगीफलाक्षत यज्ञोपवीतकटिसूत्राङ्गुरीयकवासोयुगैराचार्य्यत्वेन त्वामहं वृणे ॥ ओं वृतोऽस्मि, इत्याचार्य्यः । नमोयथाविहितं कर्म्मकुरु, इतिमाणवकेनोक्ते, ओं करवाणि, इति प्रतिवचनम् ॥ अथ चूडाकरणम् ॥ तत्र तृतीयवर्षे पुण्यदिने कृतवृद्धि [१] श्राद्धः पिता प्राङ्मुखउपविष्टः कुशप्रच्छादितमुदकमानीयाग्निस्थापनपर्य्यन्तं भूगतवामहस्तः कुशेन परिसमुह्य गोमयोदकेनोपलिप्तदेशं जलेनाभ्युक्ष्य फलपुष्पकुशानामन्यतमं गृहीत्वा रेखापञ्चकं कुर्य्यात् । तत्र प्रथमं पूर्वाग्रा द्वादशाङ्गुलप्रमाणा पृथिवीदेवताकाध्येय पीतवर्णा लेखा लिखितव्या एतल्लेखा पश्चिमभागसंलग्ना उत्तराग्रा एकविंशत्यङ्गुलप्रमाणाऽग्निदेवताकाध्येय लोहितवर्णा

[१] कृतवृद्धिश्राद्ध इत्यनेन कृतप्रातः कृत्यादि नित्यक्रियः । कृतमातृकापूजापूर्व्वकवृद्धिश्राद्धः । "अनिष्ट्वा तु पितॄन् श्राद्धैः कर्म्मकुर्य्यान्न वैदिकम् । तत्रापि मातरः पूर्व्वं पूजनीयाः प्रयत्नतः" इति कर्म्मप्रदीपवचनात् । कृतपाद प्रक्षालनाचाचमनोऽस्त इत्यादि बोध्यम् ॥

लेखा लिखितव्या एतल्लेखासँल्लग्ना पूर्व्वाग्रलेखातः षड्ङ्गुलान्तराला पूर्व्वगामिनी प्रादेशप्रमाणा प्रजापतिदेवताकाध्येय कृष्णवर्णा लेखा लिखितव्या तस्या अपि षड्ङ्गुलान्तरालापूर्व्वगामिनी प्रादेशप्रमाणा इन्द्रदेवताकाध्येय नीलवर्णा लेखा लिखितव्या तस्या अपि षड्ङ्गुलान्तराला पूर्वगामिनी द्वादशाङ्गुलप्रमाणा सोमदेवताकाध्येय शुक्लवर्णा लेखा लिखितव्या एवं लेखापञ्चकं कृत्वा ताभ्यो[१] मृदः खनित्वा ऐशान्यां क्षिपेत् । ततो लेखा अभ्युक्ष्य कांश्यभाजनोपनीतेऽग्नौ ज्वलत्तृणन्निरस्यत्यनेन, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताऽग्निसंस्कारे विनियोगः । ओं क्रव्यादमग्निम्प्रहिणोमि दूरय्यँमराज्यं गच्छतु रिप्रवाहः । ततोऽग्निं प्रणयेदनेन, प्रजापतिर्ऋषिर्ब्बृहतीच्छन्दोवृहस्पतिर्द्देवताऽग्निस्थापने विनियोगः । ओं भूर्भुवः स्वः

[१] अंगुष्ठोपकनिष्ठाभ्यां, समाचारोऽप्येवमेव ।

इत्यभिमुखमग्निं प्रण(१)येत। ततोऽञ्जलिं बद्ध्वा, ओं इहैवायमितरोजातवेदादेवेभ्योहव्यव्वँहतु प्रजानन्, इत्यग्नेरुपस्थानम्। ततः पातितदक्षिणजानुः प्रादेशामितां समिधमग्नौ तूष्णीं क्षिपेत् ततोब्राह्मणपक्षे ब्रह्म(२)वरणम्, ओं अद्यामुष्य कुमारस्य कर्त्तव्य चूड़ाकरण होमकर्म्मणि कृताकृतावेक्षकब्रह्मत्वेनैभिः पुष्पचन्दनताम्बूल यज्ञोपवीतवासोभिरमुकगोत्रममुकशर्म्माणं ब्राह्मणं त्वामहव्वृँणे, इति वृणुयात्। ओं वृतोऽस्मीति प्रतिवचनम्। ओं यथाविहितं कर्म्मकुरु। ओं करवाणि। इति प्रतिवचनम्॥ ततोऽग्रेणाग्निम्परिक्रम्य दक्षिणतोऽग्नेरवस्थाय ब्रह्मासने प्राङ्मुखीव्वाँरिधारान्दत्वा तस्याउपरि प्रागग्रान् कुशानास्तीर्य्य प्रत्यङ्मुखस्तिष्ठन् वामहस्तानामिकाङ्गुष्ठाभ्यां ब्रह्मासनाद्द-

[१] अग्निप्रज्वालनन्तु वस्त्रेण शूर्प्पेण पाण्यादिना वा न कुर्य्यात् "मुखेनोपधमेदग्निं मुखाद्ध्येषोऽध्यजायतेति" गृह्यासंग्रह वचनात्। मुखेनैव, एवं व्यजनेनापि कुर्य्यात्, एवमेव कात्यायनस्वरसः।

[२] कुशब्राह्मणपक्षे तु। ओं अद्यामुष्य कुमारस्य कर्त्तव्य चूड़ाकरणहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मकर्त्तुं त्वम्मे ब्रह्मा भव, इति। एवं सर्व्वकर्म्मसु। [उपनयनहोमकर्म्मणि] इत्यादि रूपेण बोध्यम्।

र्भमेकं गृहीत्वा नैर्ऋत्यां क्षिपेदनेन, प्रजापतिर्ऋषिरग्निर्देवता तृणनिरसने विनियोगः, ओं निरस्तः परावसुः। तत उदकमुपस्पृश्य, प्रजापतिर्ऋषिरग्निर्देवता ब्रह्मोपवेशने विनियोगः, ओं आवसोः सदनेसीद इत्युपवेशयेत्। ओं सीदामि, इति प्रतिवचनम्। ततो ब्रह्मणोपरि कुशान्दत्वा जलेनाभ्युक्ष्य ब्रह्माणं स्पृष्ट्वा, प्रजापतिर्ऋषिर्गायत्रीच्छन्दोविष्णुर्देवताजपे विनियोगः, ओं इदव्विँष्णुर्व्विचक्रमे त्रेधानिदधे पदम् समूढमस्य पांसुले, इति जपित्वा तेनैव पथापरावृत्य भूमिजपं कुर्य्यात्। अब्राह्मणपक्षे वरणप्रतिवचनवर्ज्जं सर्व्वं कार्य्यम्। ततो दक्षिणं जानुपातयित्वोपरिकृतदक्षिणहस्तः करद्वयमधोमुखम्भूमावारोप्य, परमेष्ठिऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमि जपे विनियोगः,

(१) अथकर्म्मणि ब्रह्मणोवाग्नियमः। तथा च गोभिलः। "नायज्ञियां वाचं वदेत्" अयज्ञीयां यज्ञानर्हां असंस्कृतां वाचं न वदेत्। "साधुभिर्भाषितव्यं नापभ्रंसितवै नम्लेच्छितवै,, इति ब्राह्मणाच्च। एवञ्च यदि दैवादयज्ञीयां वदेत् तदा सामोक्तां वैष्णवीं ऋचं यजुर्व्वा अथवा "नमो विष्णवे,, इत्येव वा जपेत्॥ वैष्णवीमृचमिति "ओं इदं विष्णुर्व्विचक्रमे,, इत्यादि सामोक्ताम् तदसम्भवे "ओं विष्णोः शिरसि,, इत्यादि यजुर्वेदोक्ताम्। केचित्, "ओं विष्णो रराटमसि,, इत्यादि लक्षणाम् ययुः।

ओं इदम्भूमेर्भजामह इदम्भद्रं सुमङ्गलम् परासपत्नान्बाधस्वान्येषाविन्दते धनम् । ततो दक्षिणहस्तेन कुशत्रयं गृहीत्वाऽग्नेरुत्तरादितः प्रदक्षिणक्रमेण प्रत्यृचं परिसमूहयेत्, कौत्सऋषिर्जगतीच्छन्दोऽग्निर्देवता पृष्ठस्य षड़हस्य षष्ठेऽहन्यग्निमारुतेशस्ते परिसमूहने विनियोगः, ओं इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमामनीषया भद्राहिनः प्रमतिरस्य संसद्यग्ने सख्येमारिषामावयन्तव, इत्यग्नेरुत्तरतः । ओं भरामेध्मङ्कृणवामाहवींषिते चितयन्तः पर्व्वणा पर्व्वणावयम् जीवातवेप्रतरां साधयाधियोऽग्ने सख्येमारिषामावयन्तव, इति पूर्व्वतः । ओं शकेमत्वासमिधं साधयाधियस्त्वे देवाहविरदन्त्याहुतम् त्वमादित्याँ २॥ आवहताँ २॥ ह्युशमस्यग्नेसख्येमारिषामावयन्तव इति दक्षिणतः परिसमुह्य बर्हिर्भिरग्रैर्म्मूलानि छादयन् त्रिरावृत्तं पञ्चावृत्तव्वाँ पुरस्ताद्दक्षिणत—उत्तरतः पश्चात्स्तरणं कुर्य्यात् । ततो मूलमध्याग्रक्रमेण घृताक्तान् द्विप्रादेशमितान्विंशतीध्मान् प्रजापतिम्मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात् । ततः स्तृतादेव वर्हिषः साग्रकुशपत्र-

द्वयं गर्ब्भरहितं प्रादेशमात्रं कृत्वा कुशमन्तर्द्धाय छिन्द्यादनेन, प्रजापतिर्ऋषिः पवित्रेदेवते पवित्रोत्पादने विनियोगः, ओं पवित्रेस्थोवैष्णव्यौ । ततोऽद्भिरनुमृज्यादनेन, प्रजापतिर्ऋषिः पवित्रेदेवते पवित्रसम्मार्ज्जने विनियोगः, ओं विष्णोर्म्मनसापूतेस्थः, इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे कृत्वाऽऽज्यमावपेत् । ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां गृहीत पवित्राभ्यामाज्यमूर्ध्वन्नीत्वा सकृत्-क्षिपेदनेन, प्रजापतिर्ऋषिराज्यं देवताऽऽज्योत्पवने विनियोगः, ओं देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः, द्विस्तूष्णीम् । ततो जलेन पवित्रे संमृज्य तूष्णीमेवाग्नौ क्षिपेत् । तत आज्यपात्रमुदकपात्रोदकेनानुमृज्याग्नेरुपरिनिधायाग्ने-

(१) आज्यस्थाली मृण्मयो चक्रपात्रनिष्पन्ना न ग्राह्या । तथा च कात्यायनः, कुलालचक्र निष्पन्नमासुरं मृण्मयं भवेत् । तदेव हस्तघटितं प्रशस्तं हव्यकव्ययोरिति । सएव । आज्यस्थालीतु कर्त्तव्या तैजसद्रव्यसम्भवा । माहेयी वापि कर्त्तव्या नित्यं सर्वाग्नि कर्म्मसु । आज्यस्थाल्याः प्रमाणन्तु यथाकामन्तु कारयेत् । सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते । माहेयो मृण्मयी इति शुभकर्म्मनिर्णयः ।

रुत्तरतो वारत्रयमवतारयेदित्याज्य संस्कारः। स्रुवं कुशेन संमृज्य जलेनाभ्युक्ष्य त्रिरग्नौ प्रतप्योत्तरतोवारत्रयमवतारयेदिति स्रुवसंस्कारः। ततः सैव्यनाम्न्यग्नौ तिलतण्डुलमुद्गसाधितं स्थालीपाकं पचेत् तमवतार्य्य एकविंशतिदर्भपिञ्जलीरुष्णोदक-पूर्ण-कांस्यपात्रं ताम्रमयं क्षुरं क्षुरहस्तनापितमग्नेर्द्दक्षिणतः स्थापयेत्। आनडुहगोमयं स्थालीपाकञ्चोत्तरतः स्थापयेत्। व्रीहियवतिलमाषैः प्रत्येकं पात्राणि पूरयित्वा व्रीहियवाभ्यां तिलमाषाभ्याञ्च पात्रद्वयं पूरयित्वोत्तरतआरभ्याग्नेः पुरतः स्थापयेत्। ततः पातित दक्षिणजानुरग्नेः पर्य्युक्षणं कुर्य्यात्। प्रजापतिर्ऋषिरदितिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अदितेअनुमन्यस्व, इत्यग्नेर्द्दक्षिणतोऽञ्जलिधारां पूर्व्वाग्रान्दद्यात्। प्रजापतिर्ऋषिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अनुमते अनुमन्यस्व, इतिपश्चादुत्तराग्राम्। प्रजापतिर्ऋषिः सरस्वती देवतोदकाञ्जलि प्रसेचने

१ क्वचित्सभ्यनामापि, एवं क्वचित्सत्यनाम्नीत्यपिपाठः। चूड़ायां सत्यनामा च व्रतादेशेसमुद्भव इतिभाष्यधृत गृह्यसंग्रहवचनात्

विनियोगः, ओं सरस्वत्यनुमन्यस्व, इत्युत्तरतः पूर्व्वाग्राम्। ततः प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सवितादेवताऽग्नि पर्य्युक्षणे विनियोगः, ओं देवसवितः प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय दिव्योगन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु, इति होमीयद्रव्यसहितस्याग्नेर्व्वारिधारया प्रदक्षिणं वेष्टनङ्कुर्य्यात्। तत्र पर्य्युक्षणारम्भ कोटिमभ्यन्तरतः कुर्य्यादवशान कोटिम्बहिः कुर्य्यात्। ततो जानूत्थाप्य समितकुशफलपुष्पाणि गृहीत्वा उपरिकृतदक्षिणहस्तो विरूपाक्षञ्जपेत्, परमेष्ठिऋषीरुद्ररूपोऽग्निर्द्देवताविरूपाक्ष जपे विनियोगः, ओं तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्वञ्च वाक्च मनश्चात्मा च ब्रह्मच तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों ३ महान्तमात्मानं प्रपद्ये विरूपाक्षोऽसिदन्ताञ्जिस्तस्य तेशय्यापर्णे गृहान्तरिक्षेविमितं हिरण्मयन्तद्देवानां हृदयान्ययस्मये कुम्भे अन्तः सन्निहितानि तानि बलभृच्च बलसाच्च रक्षतोऽप्रमनीअनिमिषत्तसत्यय्यँत्ते द्वादशपुत्रास्ते त्वा सव्वँत्सरे सव्वँत्सरे

कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोऽस्यहम्मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपत्वाधावामि जपन्तम्मामाप्रति जापीर्ज्जुह्वन्तम्मामा प्रतिहौषीः कुर्व्वन्तम्मामा प्रतिकार्षीस्त्वाम्प्रपद्ये त्वयाप्रसूत इदं कर्म्मकरिष्यामि तन्मेराध्यतान्तन्मे समृद्ध्यतान्तन्म-उपपद्यतां समुद्रोमाविश्वव्यचा ब्रह्मानुजानातु तुथोमाविश्ववेदा ब्रह्मणःपुत्रोऽनुजानातु श्वात्रोमा प्रचेतामैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः, इति कुशमैशान्यां त्यक्त्वा फलपुष्पं ब्रह्मणे निवेद्य दक्षिणं जानुपातयित्वा घृताक्तां समिधमग्नौ तूष्णीं क्षिपेत् । ततस्तस्य संस्कृतस्य सभ्य नाम्नोऽग्नेः पश्चादवस्थाय व्याहृतिहोमं कुर्यात् । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता-व्याहृतिहोमे विनियोगः, ओं भूःस्वाहा । प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्द्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सवितादेवताव्याहृतिहोमे विनियोगः

ओं स्वः स्वाहा । प्रजापतिर्ऋषिर्बृहतीच्छन्दोवृहस्पतिर्द्देवता महाव्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः स्वाहा । ततो माता शुचिना वस्त्रेण कुमारमाच्छाद्याग्नेः पश्चादुत्तराग्रेषु कुशेषु प्राङ्मुखीउपविशेत् । चूडाकरणकर्त्ता च तस्याः पश्चादूर्ध्वजानुः स्थितः प्राङ्मुखः सन् सवितारं मनसा ध्यायन्नापितं प्रेक्षमाणोजपेत्, प्रजापतिर्ऋषिः सविता देवता चूडाकरणे नापितप्रेक्षणे विनियोगः, ओं आयमगात्सविताक्षुरेण । ततो वायुं ध्यायन्नुष्णोदकपूर्णकांस्यपात्रं प्रेक्षमाणो जपेत् । प्रजापतिर्ऋषिर्व्वायुर्द्देवता चूडाकरणे उष्णोदकपूर्णकांस्यपात्रप्रेक्षणे विनियोगः, ओं उष्णेनवायउदकेनैधि । तत उष्णोदककांस्याद्दक्षिणपाणिना अपआदाय दक्षिणां जूटिकामव-सिञ्चेदनेन, प्रजापतिर्ऋषिरापोदेवताश्चूडाकर्म्मणि कपुष्णिका क्लेदने विनियोगः, ओं आपउन्दन्तु जीवसे । ततस्ताम्रक्षुरम्प्रेक्षमाणो जपति, प्रजापतिर्ऋषिःक्षुरोदेवताचूडाकर्म्मणि ताम्रक्षुरप्रेक्षणे विनियोगः, ओं विष्णोर्दंष्ट्रोऽसि । ततः पूर्व्वोपकल्पिताः सप्तदर्भपिञ्जलीर्ग्गृहीत्वा ऊर्द्ध्वमूला-

दक्षिणजूटिकायान्निदध्यादनेन मन्त्रेण, प्रजापतिर्ऋषिरोषध्योदेवताः चूड़ाकर्म्मण्यभिशिरोग्रदर्भपिञ्जलीनिधाने विनियोगः, ओं ओषधे त्रायस्वैनम् । ततो दर्भपिञ्जलीभिः सहितां कपुष्णि(१)कां वामहस्तेन गृहीत्वा दक्षिणहस्तेन ताम्रक्षुरं कपुष्णिकायान्निदधाति । प्रजापतिर्ऋषिः स्वधितिर्द्देवता चूड़ाकर्म्मणि कपुष्णिकायां ताम्रक्षुरनिधाने विनियोगः, ओं स्वधिते मैनं हिंसीः । ततः केशच्छेदमकुर्व्वन् ताम्रक्षुरं प्राङ्मुखं प्रेरयेदनेन, प्रजापतिर्ऋषिः पूषा देवता चूड़ाकर्म्मणि कपुष्णिकायां क्षुरप्रेरणे विनियोगः, ओं येनपूषावृहस्पतेर्व्वायोरिन्द्रस्यचावपत् तेन ते वपामि ब्रह्मणाजीवातवेजीवनाय दीर्घायुष्ट्वाय वर्च्चसे। ततो द्विस्तूष्णीं प्रेरयेत् । ततो लौहक्षुरेण कपुष्णिकां तूष्णीं छित्वा दर्भपिञ्जलीभिः सहितां पूर्व्वोपकल्पित आनडुह गोमये

(१) कपुष्णिका तु मूर्द्धोभयपार्श्वस्थकेशाः । कपुष्णिकाऽभितः केशाः मूर्द्ध्नि पश्चात्कपुच्छलमिति वचनात् । कंशिरः पुष्णाति शीतादिभ्य इति व्युत्पत्तेरिति महामहोपाध्याय मुरारिमिश्राः ।

स्थापयेत्। एतदनन्तरं कृकाटिकोपरिबद्धजूटिकायां कपुच्छलाभिधानायां सेचनादि पूर्व्ववत्कुर्य्यात्, तत्र कांस्यपात्रादुष्णोदकं दक्षिणपाणिनाऽऽदाय कपुच्छलाभिधानां जूटिकामभिषिञ्चेदनेन,प्रजापतिर्ऋषिरापोदेवताश्चूड़ाकर्म्मणि कपुच्छलक्लेदने विनियोगः, ओं आपउन्दन्तु जीवसे । ततस्ताम्रक्षुरम्प्रेक्षमाणोजपति, प्रजापतिर्ऋषिः क्षुरोदेवताचूड़ाकर्म्मणि ताम्रक्षुरप्रेक्षणे विनियोगः, ओं विष्णोर्दंष्ट्रोऽसि । ततः सप्तदर्भपिञ्जलीर्ग्गृहीत्वा ऊर्द्ध्वमूलाः कपुच्छले निदध्यात् । प्रजापतिर्ऋषिरोषध्योदेवताश्चूड़ाकर्म्मण्यभिशिरोऽग्रदर्भपिञ्जलीनिधाने विनियोगः, ओं ओषधे त्रायस्वैनम् । ततो वामहस्तेन कपुच्छलसहिताः सप्तदर्भपिञ्जलीर्ग्गृहीत्वा दक्षिणहस्तेन ताम्रक्षुरं कपुच्छले निदधाति । प्रजापतिर्ऋषिः स्वधितिर्द्देवताचूड़ाकर्म्मणि कपुच्छले ताम्रक्षुरनिधाने विनियोगः, ओं स्वधिते मैनंहिंसीः ॥ ततस्तं क्षुरं केशच्छेदमकुर्वन् सकृत् प्राङ्मुखं प्रेरयेत् । प्रजापतिर्ऋषिःपूषादेवता चूड़ाकर्म्मणि कपुच्छले ताम्रक्षुरप्रेरणे विनियोगः, ओं येन पूषावृहस्पतेर्व्वायोरिन्द्रस्य चावपत

तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे । ततो द्विस्तूष्णीं प्रेरयेत् । ततो लौहक्षुरेण कपुच्छलं छित्वा सहदर्भपिञ्जलीभिस्तस्मिन्नेव गोमये स्थापयेत् । तत उत्तर जूटिकायां सेचनादि पुनः पूर्व्ववत् कुर्य्यात् । प्रजापतिर्ऋषिरापोदेवताश्चूड़ाकर्म्मणि जूटिकाक्लेदने विनियोगः, ओं आपउन्दन्तु जीवसे । ततस्ताम्रक्षुरं प्रेक्षमाणोजपेत् । प्रजापतिर्ऋषिः क्षुरोदेवता चूड़ाकर्म्मणि ताम्रक्षुरप्रेक्षणे विनियोगः, ओं विष्णोर्द्दंष्ट्रोऽसि । ततः सप्तदर्भपिञ्जलीर्ग्गृहीत्वा ऊर्द्धमूला उत्तरजूटिकायान्निदधाति । प्रजापतिर्ऋषिरोषध्योदेवताश्चूड़ाकर्म्मण्यभिशिरोऽग्रदर्भपिञ्जलीनिधाने विनियोगः, ओं ओषधेत्रायस्वैनम् । ततः सहजूटिकया वामहस्तेन दर्भपिञ्जलीर्ग्गृहीत्वा दक्षिणहस्तेन जूटिकायां ताम्रक्षुरन्निदधाति । प्रजापतिर्ऋषिःस्वधितिर्द्देवता चूड़ाकर्म्मणि जूटिकायां ताम्रक्षुरनिधाने विनियोगः, ओं स्वधिते मैनं हिंसीः । ततस्तं क्षुरं केशच्छेदमकुर्व्वन् सकृत्प्राङ्मुखं प्रेरयेत् । प्रजापतिर्ऋषिः पूषादेवता चूड़ाकर्म्मणि जूटिकायां क्षुरप्रेरणे विनियोगः, ओं येनपूषा-

वृहस्पतेर्व्वायोरिन्द्रस्य चावपत्तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे । ततो द्विस्तूष्णीं प्रेरयेत् । ततो लौहक्षुरेण जूटिकाञ्छित्वा सह दर्भपिञ्जलीभिस्तस्मिन्नेवानडुह गोमये स्थापयेत् । ततः पाणिभ्यां कुमारस्य मूर्द्धानं परिगृह्य जपति । प्रजापतिर्ऋषिरुष्णिक्छन्दोजमदग्न्यादयोदेवताः कुमारस्य मूर्द्धानं परिगृह्य जपे विनियोगः, ओं त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषय्यँद्देवानां त्र्यायुषन्तत्ते अस्तु त्र्यायुषम् । ततोऽग्नेरुत्तरतः कुमारस्य यथाकुलं चूड़ाङ्कारयेत् । तत उपविश्य व्याहृतिहोमं कुर्य्यात् । प्रजापतिर्ऋषिर्ग्गायत्रीच्छन्दोऽग्निर्द्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्द्देवता व्याहृति होमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सवितादेवता व्याहृतिहोमे विनियोगः, ओं स्वः स्वाहा । प्रजापतिर्ऋषिर्ब्बृहतीच्छन्दोवृहस्पतिर्द्देवता महाव्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः स्वाहा ॥ अधुना यदि शाट्यायनहोमः क्रियते तदा पद्धतिशेषेऽन्वे-

द्रव्यः ॥ ततः प्रादेशमितां समिधमग्नौ तूष्णीं क्षिपेत् । पुनरग्नेः पर्य्युक्षणादि । प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सविता देवताऽग्निपर्य्युक्षणे विनियोगः, ओं देवसवितः प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय दिव्योगन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु । इति होमीयद्रव्यसहितस्याग्नेर्व्वारिधारया वेष्टनं कुर्य्यात् । प्रजापतिर्ऋषिरदितिर्देवतोदकाञ्जलि प्रसेचने विनियोगः, ओं अदिते अन्वमंस्थाः । इति दक्षिणतः । प्रजापतिर्ऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अनुमते अन्वमंस्थाः । इति पश्चात् । प्रजापतिर्ऋषिः सरस्वती देवतोदकाञ्जलि प्रसेचने विनियोगः, ओं सरस्वत्यन्वमंस्थाः, इत्युत्तरतः । पूर्व्वविपरीतार्व्वारिधारान्दद्यात् । ततो दर्भजूटिकाम्बध्वा, प्रजापतिर्ऋषिर्व्वायोर्देवता दर्भतृण भ्यञ्जने विनियोगः, ओं अक्तंरिहाणाव्यन्तु वयः । इत्यग्रमध्यमूलक्रमेण वारत्रयं घृताक्तां जलेनाभ्युक्ष्याग्नौ त्यजेदनेन । प्रजापतिर्ऋषिरनुष्टुप्छन्दोरुद्रोदेवता दर्भजूटिकाहोमे विनियोगः, ओं यःपशूना-

मधिपती रुद्रस्तन्तिचरोवृषा पशूनस्माकम्माहिंसीरेतदस्तु हुतन्तव स्वाहा । ततः पूर्णाहुतिः । प्रजापतिर्ऋषिर्व्विराड्गायत्रीच्छन्द इन्द्रोदेवता यशस्कामस्य यजनीयप्रयोगे विनियोगः, ओं पूर्णहोमय्यँशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरव्वृँणे यशसा भामि लोके स्वाहा । इति घृतपुष्पफलसहितां पूर्णाहुतिं दद्यात् । ततः, ओं वसु(१)भ्यः स्वाहा । इत्यविच्छिन्नामाज्यधारान्दद्यात् । ततो ब्रह्मदक्षिणा । ओं अद्य कृतैतच्चूड़ाकरणहोमकर्म्मणि कृताकृतावेक्षकाय ब्रह्मणे इदं पूर्णपात्रं प्रजापतिदैवतं दक्षिणां तुभ्यमहं सम्प्रददे । ततोऽग्निप्रदक्षिणेन हस्तं नीत्वा ब्रह्मोत्थापनं ग्रन्थिविमोको वा । ततः स्रुव(२)लग्नभस्मना त्र्यायुषकरणम् । ओं त्र्यायुषं

(१) वसुभ्यः स्वाहेति । तत्र गृह्यासंग्रहकारः । यज्ञवास्तुक्रियां कृत्वा विधिदृष्टेन कर्म्मणा । आज्यधारामविच्छिन्नां पातयेदनलोपरि, इति ।

(२) स्रुवसल्लँग्नेति । ततोऽनामिकया कुर्य्याद्बिन्दुं सघृतभस्मना । हृद्यंसयोर्ल्ललाटे च त्र्यायुषेति पदैः क्रमादिति वचनं प्रमाणयन्ति शिष्टा इति मुरारिमिश्राः ।

जमदग्नेः, इति हृदि । ओं कश्यपस्य त्र्यायुषम्, इति दक्षिणबाहुमूले । ओं अगस्त्यस्य त्र्यायुषम्, इति वामबाहुमूले । ओं यद्देवानां त्र्यायुषन्तन्मे अस्तु त्र्यायुषम्, इति शिरसि विन्दुरूपं कुर्य्यात । एवं कुमारेऽपि तत्र तन्मे इत्यस्य स्थाने तत्ते इति विशेषः । ततः पात्रस्थजलमपनीय पात्रं जलपुष्पाभ्यामापूर्य्य दक्षिणादानम् । ओं अद्य कृतैतच्चूड़ाकरण कर्म्मप्रतिष्ठार्थं गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहं समुत्सृज्ये । ततः पूर्व्ववद्वामदेव्यगानम् । ततः कुमारः स्थालीपाकमासादित व्रीहियवादिक(१)ञ्च नापिताय प्रतिपादयेत् । तत आचारात् सकेशमानडुहगोमयं सपाझिनिके जले क्षिपेत् ॥ इति चूड़ाकरणम् ॥

* अथोपनयनम् ॥ ❀ ॥ तत्राचार्य्यकरणपक्षे वरणम् (२) ओं अद्यामुकमासीयामुक-

(१) कृसरोनापिताय सर्व्वबीजानि चेति गोभिलोक्तेः ।

(२) वरणमिदं अन्यदिनकृत चूड़ाकरणस्य उपनयनपक्षे बोध्यम् । आधुनिकास्तु एकस्मिन्नेव दिने चूड़ाकरणादि संस्कारान् कुर्व्वन्ति तत्र वरणवाक्यं पूर्व्वलिखितमेव बोध्यम् । नात्र पुनर्व्वाक्यकरणम् ।

पक्षीयामुकतिथौ अमुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचन्दन ताम्बूलयज्ञोपवीताङ्गुरीयक वासोभिरात्मानमुपनाययितुमाचार्य्यत्वेन त्वामहं वृणे । ओं वृतोऽस्मीति प्रतिवचनम् । ओं यथाविहितं कर्म्मकुरु । ओं करवाणीति प्रतिवचनम् ॥ गर्भाष्टमेऽष्टमे वा वर्षे उपनयनविहितदिने प्रातर्म्माणवकस्य पयः पानमात्ररूपं भो[१]जनम् । ततो मुण्डनं ततः स्नानं ततःकुण्डला-

(१) उपनयनदिने प्रातरुपक्रम्य ॥ गोभिलः ॥ यदहरुपैष्यन्माणवकोभवति प्रगएवैनस्तदहर्भोजयन्ति कुशलीकारयन्त्याप्लावयन्त्यलंकुर्व्वन्त्यहतेन घाससाऽऽच्छादयन्तीति । यदहरुपैष्यन्निति उपनयनं कारयिष्यन् । माणवकः अनधीतवेदः । अनृचोमाणवोज्ञेय एणः कृष्णमृगः स्मृतः । रुरुर्गौरमृगः प्रोक्तस्तमुनिः शणउच्यते, इति कात्यायनात । अनृचो वेदशून्यः । प्रगएव प्रातरेव । एनं माणवकं, भोजनञ्चात्र दुग्धादेरेव । तथा च गृह्यान्तरम् । 'पयोयवाग्वामिक्षा आहाराः क्रमशोद्विजातीनामिति । अतएव प्रातः काले दुग्धादि आहारेण माणवकम्भोजयन्तीत्यपि बहुजनीनाचारः संगच्छते । ननु यदहरुपैष्यन्माणवकोभवति प्रगएवैनं तदहर्भोजयन्ति, कुशलोकारयन्तीत्यादिगोभिलोक्तेः कृतदुग्धाहारस्य माणवकस्य तस्मिन्नेव दिने समावर्त्तने कथं वपनं स्यात् । भोजनानन्तरं वपननिषेधात् । तथा च ज्योतिषे । न स्नानमात्रगमनोन्मुखभूषितानामभ्यक्तरागरणकालनिवासजानाम् । संध्यानिशा कुजदिने च तिथौ च रिक्ते क्षौरं हितं न नवमेह्न नचापि षष्ठ्याम् इति, तन्न । ज्योतिः शास्त्रोक्तनिषेधस्यान्य क्षौर

विषयत्वेनाप्युपपत्तेः। अन्यथा रौहिण्यादौ नववस्त्रपरिधान निषेधात् तत्र विवाहविधेः नववस्त्रपरिधानस्य महानर्थक्यं स्यात्। तथास्याच्च रविवारादावुपनयनं तत्र क्षौर निषेधात्। अतएव "ब्राह्मणान्भोजयेत्तञ्च पर्य्युप्तशिरसमलंकृतमानयन्तीति, पारस्करेऽपि भोजनानन्तरमेव मुण्डनं दर्शितमिति" धीरपद्धतिस्वरसोऽप्येव-मेवेति मुरारिमिश्रस्वरसः॥

दिनाऽलङ्करणम् ततो नूतनवस्त्रपरिधानम्। तत आचार्य्यः कृतमातृकापूजावृद्धिश्राद्धः प्राङ्मुखउपविष्टोऽग्निस्थापनदेशं कुशैः[१]परिसमुह्य गोमयोदकेनोपलिप्य कुशप्रच्छादित जलेनाभ्युक्ष्याऽग्निस्थापनपर्य्यन्तव्वाँम [२] हस्तमधोमुखं भूमावारोप्य फलपुष्पकुशानामन्यतमं गृहीत्वा रेखा[३]पञ्चकं कुर्य्यात्। तत्र प्रथमं पूर्व्वाग्रा द्वादशाङ्गुलप्रमाणा पृथिवीदेवताकाध्येय

(१) कुशैःपरिसमुह्येति। सम्मार्ज्येतिशेषः। तथा 'कुशैः सम्मार्ज्यं भूमिं शुद्धामादौ शुचिस्ततः। हस्तमात्रां चतुरस्रां गोमयेनोप-लेपयेत्। तथा च गृह्यासंग्रहः। प्राङ्नीचं ब्रह्मवर्चस्कमुदङ्नीचं यशोत्तमम्। पित्र्यं दक्षिणतोनीचं प्रतिष्ठालम्भकं समम्, इति।

(२) वामहस्तमिति। एतच्च रेखोल्लेखनं यावदग्निस्थापनं सव्यहस्तम्भूमौ निधाय कर्त्तव्यम्। तथा च 'सव्यं भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु। तावन्नोत्थापयेत्पाणिं यावदग्निं निधापयेत्, इति गृह्यासंग्रहवचनात्। एवमेव चन्द्रकान्ततर्कालङ्कारः।

(३) रेखाकरणन्तु हस्तमात्रस्थण्डिलाभ्यन्तरे दक्षिणांशएव नतु मध्यांशे। हस्तमात्रस्थण्डिलेप्युदग्गतैकविंशत्यङ्गुल रेखानु-

रोधात्। सप्तसप्तांगुलान्तरितप्राग्गतरेखात्रयस्योदग्गतरेखाऽनुषक्तस्यानुरोधाच्च। अतएव हस्तमितस्थण्डिले स्मर्य्यते "अंगुष्ठ-मात्रं भूभागं त्यक्त्वा दक्षिणतः सुधीः। उत्तरे द्व्यंगुलन्त्यक्त्वा पश्चिमेऽप्यङ्गुलद्वयमिति गृह्यसूत्रभाष्यकारधृतत्वाच्चेति॥

पीतवर्णा लेखा लिखितव्या, तल्लेखा पश्चिमभाग संलग्नोत्तराग्रैकविंशत्यङ्गुल प्रमाणाऽग्निदेव-ताकाध्येय लोहितवर्णा लेखा लिखितव्या, एतल्लेखा संलग्ना पूर्व्वगामिनी प्रादेशप्रमाणा प्रजापतिदेवताकाध्येय कृष्णवर्णा लेखा लिखितव्या, तस्या अपि षड्ङ्गुलान्तराला पूर्व्वगामिनी प्रादेशप्रमाणा इन्द्रदेवताकाध्येय नीलवर्णा लेखा लिखितव्या, तस्या अपि षड्ङ्गुलान्तराला पूर्व्वगामिनी द्वादशाङ्गुलप्रमाणा सोमदेवताकाध्येय शुक्लवर्णा लेखा लिखितव्या, एवं लेखापञ्चकं कृत्वा ताभ्योमृदः खनित्वैशान्यां क्षिपेत्। ततो लेखा अभ्युक्ष्य कां[१]स्य

(१) कांस्य भाजनोपनीतेनेति। अभावे शरावेणापि, तथाहि। "एतदेवाग्नि प्रणयनमधिकृत्याहाङ्गिराः। कपालैर्भिन्नपात्रैर्वा आयसैर्गोमयेन च। नाग्निप्रणयनं कार्य्यंय्यँजमानभयावहम्।' अल्पः प्रणीत विच्छिन्नोऽसमिद्धश्चापरिश्रुतिः। त्वरया पुनरानीतो यजमानभयावहः॥ तस्माच्छुभेन पात्रेण अविच्छिन्ना कृशं बहु। अग्निप्रणयनं कार्य्यंय्यँजमानसुखावहम्॥

शुभं पात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः । तस्याभावे शरावेण नवेनाभिमुखञ्चतमिति " शुभकर्म्मनिर्णय धृतवचनात् । एवमेव गृह्यसूत्रभाष्यम् । यत्तु क्वचिच्छरावेण निषेधस्तत्पुरातन विषयः कांस्यपात्र सद्भावविषयश्च ।

भाजनोपनीतेऽग्नौ ज्वलत्तृणन्निरस्यत्यनेन । प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताऽग्निसंस्कारे विनियोगः, ओं क्रव्यादमग्निम्प्रहिणोमि दूरय्यँमराज्यं गच्छतु रिप्रवाहः । ततोऽग्निं प्रणयेदनेन प्रजापतिर्ऋषिर्बृहतीच्छन्दोवृहस्पतिर्देवताऽग्निस्थापने विनियोगः, ओं भूर्भुवः स्वः । इत्यभिमुखमग्निं प्रणयेत् । ततोऽञ्जलिं बद्ध्वा, ओं इहैवायमितरो जातवेदादेवेभ्यो हव्यव्वँहतु प्रजानन् । इत्यग्नेरुपस्थानम् । ततः पातितदक्षिणजानुः प्रादेशमितां समिधमग्नौ तूष्णीं क्षिपेत् । ततो ब्राह्मणपक्षे ब्रह्म(१)वरणम् । ओं अद्य मत्कर्त्तव्योपनयन होम कर्म्मणि कृताकृतावेक्षक ब्रह्मत्वेनैभिः पुष्पचन्दन ताम्बूल यज्ञोपवीत कटिसूत्राङ्गुलीयकवासोभिरमुकगोत्रममुकशर्म्माणं ब्राह्मणं त्वामहं

---

(१) अग्निस्थापनानन्तरमेव ब्रह्मस्थापनम् । अत्र यद्यपि लेखनाभ्युक्षणाग्निप्रणयनानि कृत्वा समिद्दहेत् । ततो भूमिजपं कृत्वा कुर्य्यात्परिसमूहनम् । ब्रह्माणमुपसंकल्प्य चरुश्रपणमाचरेदित्यङ्गिरोवचनादग्निस्थापनानन्तरं भूमिजपः ततः परिसमूहनं

ततो ब्रह्मस्थापनमेतादृक्क्रमेणायाति तथापि 'जातस्य लक्षणं कृत्वा तं प्रणीय समिध्य च । आधाय समिधञ्चैव ब्रह्माणमुपवेशयेदिति, कात्यायनवचनादग्निस्थापनानन्तरमेव ब्रह्मस्थापनं ततो भूमिजपादिकम्, वस्तुतस्तु । अङ्गिरोवचनं कर्त्तव्यतामात्रपरं कात्यायनवचनन्तु क्रमपरमित्यत्र क्रमे सूत्रकृत्तात्पर्य्यमुन्नीयते । तस्मादग्निस्थापनानन्तरमेव ब्रह्मस्थापनमिति । वीरपद्धत्यादिकमप्येवमेव । केचित्तु विकल्पएवात्रेत्याहुरिति मुरारिमिश्राः ।

वृणे । ओं वृतोऽस्मीति प्रतिवचनम् । ओं यथाविहितं कर्म्मकुरु । ओं करवाणि, इति प्रतिवचनम् । ततोऽग्रेणाग्निं परिक्रम्याग्नेर्द्दक्षिणतोऽवस्थाय ब्रह्मासने प्राङ्मुखीव्वाँरिधारान्दत्वा तस्याउपरि प्रागग्रान् कुशानास्तीर्य्य प्रत्यङ्मुखस्तिष्ठन् वामहस्ताङ्गुष्ठानामिकाभ्यां ब्रह्मासनाद्दर्भमेकं गृहीत्वा नैर्ऋत्यां क्षिपेदनेन । प्रजापतिर्ऋषिरग्निर्देवता तृणनिरसने विनियोगः, ओं निरस्तः परावसुः । तत उदकमुपस्पृश्य, प्रजापतिर्ऋषिरग्निर्देवता ब्रह्मोपवेशने विनियोगः, ओं आवसोः सदनेसीद, इत्युपवेशयेत् । ओं सीदामीति प्रतिवचनम् । ततो ब्रह्माणं स्पृष्ट्वा जलेनाभ्युक्ष्योपरि कुशान्दत्वा जपेत् । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोविष्णुर्देवता जपे विनियोगः, ओं इदव्विँष्णुर्व्वि-

चक्रमे त्रेधानिदधे पदम् समूढमस्य पांसुले, इति जपित्वा तेनैव पथा परावृत्य स्वस्थानं गत्वा भूमिजपं कुर्य्यात् । अब्राह्मणपक्षे वरणप्रतिवचनवर्ज्जं सर्व्वं कुर्य्यात् । ततो दक्षिणञ्जानुपातयित्वोपरिकृतदक्षिणहस्तोऽधोमुखं करद्वयं भूमावारोप्य, परमेष्ठिऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिजपे विनियोगः, ओं इदं भूमेर्भजामह इदं भद्रं सुमङ्गलम् परासपत्नान्वाधस्वान्येषां विन्दते धनम् ।

(१) दर्भ बटुनिर्म्माणं यथा गृह्यासंग्रह परिशिष्टे । ऊर्द्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः । दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः । ब्रह्मग्रन्थिप्रकारो यथा पुराणे । 'द्विरावृत्या तु मध्ये वै अर्द्धावृत्याग्रदेशतः । ग्रन्थिः प्रदक्षिणावर्त्तः सब्रह्मग्रन्थिसंज्ञकः, इति । केचित्तु यज्ञवास्तुनि मुष्ट्यां च स्तम्बे दर्भवटौ तथा । दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि, इति कर्म्मप्रदीपवचनाद्दर्भसंख्या नेच्छन्ति । अन्ये तु 'पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन च विष्टरः, इति वचनं यदि समूलं तदा, 'सम्भवासम्भवाभ्यां नियमानियमयोर्व्यवस्थितो विकल्पः' इति परिशिष्टप्रकाशः शाखान्तरीयमिति तत्त्वकारः । अन्यापि संख्या कौथुमादिव्यातिरिक्तविषयेति गोभिलभाष्ये स्पष्टम् । वस्तुतः कुशैरित्युपलक्षणं तेन पञ्चाशत्पत्रकोब्रह्मा तदर्द्धेन तु विष्टर इति वचनं संगच्छते । पद्धतिरप्येवमेव । एवं च कात्यायनीय सङ्ख्योऽनियमोक्तिरेतावत्कुशाद्यभावे इति द्रष्टव्यमिति मुरारिमिश्रलिखितमेव समीचीनमिति ।

ततो दक्षिणहस्तेन कुशत्रयं गृहीत्वाऽग्नेरुत्तरादितः प्रदक्षिणक्रमेण प्रत्यृचं परिसमूहयेत् । कौत्सऋषिर्जगतीच्छन्दोऽग्निर्देवता पृष्ठस्य षड़हस्य पष्ठेऽहन्यग्निमारुतेशस्ते परिसमूहने विनियोगः, ओं इमं स्तोममर्हते जातवेदसे रथमिव सम्महे मामनीषया भद्राहिनः प्रमतिरस्य संसद्यग्ने सख्ये मारिषामावयन्तव, इत्यग्नेरुत्तरतः । ओं भरामेध्मं कृणवामाहवींषि ते चितयन्तः पर्व्वणापर्व्वणावयम् जीवातवे प्रतरां साधयाधियोऽग्ने सख्ये मारिषामावयन्तव, इति पूर्व्वतः । ओं शकेमत्वा समिधं साधया धियस्त्वे देवाहविरदन्त्याहुतम् त्वमादित्याँ२। आवहताँ२॥ ह्युश्मस्यग्ने सख्ये मारिषामावयन्तव, इति दक्षिणतः परिसमुह्य । बर्हिर्भिरग्रैर्म्मूलान्याच्छादयन् त्रिरावृत्तम्पञ्चावृत्तव्वाँ पुरस्ताद्दक्षिणतउत्तरतः पश्चात्स्तरणं कुर्य्यात् । ततो मूल मध्याग्रक्रमेण घृताक्तां द्विप्रादेशमितान्विंशतीध्मान् प्रजापतिम्मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात् । ततः स्तृतादेवबर्हिषः

१ इध्मानिति इदञ्चेध्माधानं परिस्तरणानन्तरमेव । तथा च गृह्यान्तरम् । कुशैः समस्तं परिस्तीर्य्येध्ममभ्याधायाज्यं

संस्कुरुते, इति । इध्माश्च "खादिर पालाशालाभेविभीतक, तिल्वक, बाधक, नीप, निम्ब, राजवृक्ष, शाल्मल्यऽलु, दधित्थ, कोविदार, श्लेष्मातक,-वज्ज सर्व्वेवनस्पतीनामिध्मो यथार्थं स्यात्„ गोभिलसूत्रादश्वत्थादीनामपि ग्राह्याः । तदुक्तम् "इध्मानुपकल्पयते खादिराम्वा पालाशान्वा तयोरभावे विभीतकादिवर्ज्जं सर्व्वेवनस्पतीनामित्यादि । अङ्गिराः । इध्मः समानवृक्षाणां द्विप्रादेशः प्रमाणतः । कर्म्म प्रदीपे,—कात्यायनः, समिधोऽष्टादशेध्मस्य प्रवदन्ति मनीषिणः । दर्शे च पौर्णमासे च क्रियास्वन्यासु विंशतिम् । तथा । मूलमध्याग्रदेशेषु ईषत्सिक्तास्तु निर्व्वपेत् । अयं च सेको घृतादिनैव अतएवोक्तं पद्धतौ 'मूलमध्याग्रक्रमेण घृताक्तानिति, स्थौल्यादिकञ्च धर्म्मान्तरमिध्मस्य समित्समानमेव ग्राह्यमिति शुभकर्म्मनिर्णयः । एवमेव गृह्यभाष्य स्वरसः ॥

साग्रकुशपत्रद्वयं गर्भरहितं प्रादेशमात्रं कृत्वा कुशमन्तर्द्धाय छिन्द्यादनेन । प्रजापतिर्ऋषिः पवित्रे देवते पवित्रोत्पादने विनियोगः, ओं पवित्रेस्थोवैष्णव्यौ । ततोऽद्भिरनुमृज्यादनेन, प्रजापतिर्ऋषिः पवित्रे देवते पवित्रसम्मार्ज्जने विनियोगः, ओं विष्णोर्म्मनसा पूतेस्थः, इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे धृत्वाऽऽज्यमावपेत् । ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां गृहीतपवित्राभ्यां

(१) आज्यमिति । अग्निना चैव मन्त्रेण पवित्रेण च चक्षुषा । चतुर्भिरेव यत्पूतं तदाज्यमितरद्घृतम् ॥ एतदन्यदसंस्कृतं यत्तद्घृतम् । एतदुक्ताज्यस्थाननियुक्तानां घृतादीनामप्याज्यशब्देनैवोच्चारणं कर्त्तव्यम् । तथा च तत्रैव । घृतं वा यदि वा तैलं

पयो वा दधि यावकम् । आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते । एतेनाज्यस्याभावे आज्यस्थाने नियुक्तानामेषामाज्यशब्दो विधीयते । तत्रापि दध्नोऽनधिश्रयणमन्येषां श्रयणम । तथाच, आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते । अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम् ॥ तथा । यथा सीमन्तिनो नारी पूर्व्वगर्भेण संस्कृता । एवमाज्यस्य संस्कारः संस्कारे विधिनोदिते, इति वचनात् । सकृत्संस्कृतपात्रजातानां सर्व्वेषां गर्भाणां संस्कृतत्ववत्' । आज्यसंस्कारोप्याज्यस्य तत्पात्रस्य च इति सकृत्संस्कृताज्यपात्रे यान्याज्यानि निः क्षिप्यन्ते तानि सर्व्वाणि संस्कृतानि भवन्ति न पुनरमीषां पृथक् संस्कारः करणीयः । एवमेवाश्वलायनस्वरसोऽपीति गृह्यासंग्रहभाष्ये स्पष्टम ।

आज्यमूर्द्धन्नीत्वा, प्रजापतिर्ऋषिराज्यन्देवताऽऽज्योत्पवने विनियोगः, ओं देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः, इत्यग्नौ वारमेकं जुहुयात्, द्विस्तूष्णीम् । ततो जलेन पवित्रे सम्मृज्याग्नेरुपरिनिधायोत्तरतोवारत्रयमवतारयेदित्याज्यसंस्कारः । ततः स्रुवं[१]कुशेन संमृज्य जलेनाभ्युक्ष्य त्रिरग्नौ प्रतप्याग्नेरुत्तरतोवारत्रयमवतारयेदिति स्रुवसंस्कारः ॥ ततः पातित दक्षिणजानुरग्नेः पर्य्युक्षणं कुर्य्यात्, प्रजापतिर्ऋषिरदितिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः,

(१) स्रुव स्वरूपमाह शुभकर्म्मनिर्णये कात्यायनः । खादिरो वाऽथ पार्णो वा द्विवितस्तिः स्रुवः स्मृतः । स्रुग्वाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः । स्रुवाग्रे घ्राणवत्खातं द्व्यङ्गुष्ठपरिमण्डलम् । स्रुवः शरावत्खातं सनिर्व्वाहं षडङ्गुलम । प्राक्शस्तेषां

कुशैः कार्य्यः संप्रभागो जुहृषता। प्रतापनं च लिप्तानां प्रक्षाल्योष्णेन वारिणा, इति। पर्ण्णः पलाशः। प्रगृह्यते अत्रेति प्रग्रहो
दण्डः। सच तयोः स्रुवस्रुचोर्व्वर्त्तुलः कार्य्यः। घ्राणवत् नासास्रोतोवत्। तेन बिपुष्करत्वमायाति। तथा चोक्तम्। स्रुवाग्रे
खननं कुर्य्यात्पङ्के मृगपदाकृतीति, सनिर्व्वाहम घृतनिर्ग्गममार्गसहितं, षडङ्गुलमित्यर्थः। प्राकशः मूलमारभ्य तदग्रदेशाभिमुखम्
तेषां स्रुवादीनां लिप्तानां घृतादिलेपताम्। उभयोः संस्कारे प्रसक्ते (प्राप्ते) स्रुवपवादौ संस्कार्य्यः, "सर्वे स्रुवमेवाग्रे सम्मार्ष्ट्य-
थेतराः स्रुच,, इति शतपथश्रुतेः। वस्तुत आधुनिक व्यवहार परम्पराप्राप्त स्रुवनिर्म्माण प्रकारस्तु अग्रे वक्ष्यते।

ओं अदिते अनुमन्यस्व, इत्यग्नेर्द्दक्षिणतोऽञ्जलिधारां पूर्व्वाग्रां दद्यात्, प्रजापतिर्ऋषिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अनुमते अनुमन्यस्व, इति पश्चादुत्तराग्राम्। प्रजापतिर्ऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने विनियोगः, ओं सरस्वत्यनुमन्यस्व, इत्युत्तरतः पूर्व्वाग्राम्। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सवितादेवताऽग्निपर्य्युक्षणे विनियोगः, ओं देवसवितः प्रसुवयज्ञम्प्रसुवयज्ञपतिं भगाय दिव्योगन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु इति होमीयद्रव्यसहितस्याग्नेर्व्वारिधारया वेष्टनम्। ततो जानूत्थाप्य समित्कुशफलपुष्पं गृहीत्वा उपरिकृतदक्षिणहस्तोविरूपाक्षं जपेत्, परमेष्ठिऋषीरुद्ररूपोऽग्निर्द्देवताविरूपाक्षजपे विनियोगः,

ओं तपश्च तेजश्च श्रद्धाच ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्त्वञ्च वाक्च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों ३ महान्तमात्मानम्प्रपद्ये विरूपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्यापर्णे गृहान्तरिक्षे विमितं हिरण्मयन्तद्देवानां हृदयान्ययस्मये कुम्भे अन्तः सन्निहितानि तानि बलभृच्च बलसाच्च रक्षतोऽप्रमनीअनिमिषत्तत्सत्यय्यँत्ते द्वादशपुत्रास्ते त्वा सव्वँत्सरे सव्वँत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोऽस्यहम्मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपत्वाधावामि जपन्तम्मामा प्रतिजापीर्ज्जुह्वन्तम्मामा प्रतिहौषीः कुर्वन्तम्मामा प्रतिकार्षीस्त्वाम्प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतान्तन्मे समृध्यतान्तन्मउपपद्यतां समुद्रोमा विश्वव्यचा ब्रह्माऽनुजानातु तुथोमा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रोमा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः, इति कुशमैशान्यां त्यक्त्वा फल-

पुष्पं ब्रह्मणे निवेद्य दक्षिणं जानु पातयित्वा घृताक्तां समिध[१]मग्नौ तूर्ष्णीं क्षिपेत् । ततस्तस्य संस्कृतस्य समुद्भव[२] नाम्नोऽग्नेः पश्चात्स्वसन्निधौ माणवकमुपवेश्य, व्याहृतिहोमं कुर्य्यात् । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सविता देवता व्याहृतिहोमे विनियोगः, ओं स्वः स्वाहा । प्रजापतिर्ऋषिर्बृहतीच्छन्दोबृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः स्वाहा । ततः

[१] समित्स्वरूपमाह कर्म्मप्रदीपे कात्यायनः । नाङ्गुष्ठादधिका ग्राह्या समित्स्थूलतमा क्वचित् । न वियुक्तत्वचाचैव न स कीटा न पाटिता ॥ प्रादेशान्नाधिका नोना न तथास्याद्विशाखिका । न सपर्णा न निर्व्वीर्य्या होमेषु च विजानता इति । द्विशाखिका विविधशाखा युक्ता, शाखाविनिर्गतशाखाप्रभवा विशाखिकेति केचित् । निर्व्वीर्य्या निस्सारा ॥ चिन्तामणौ । समिधां लक्षणव्वँद्ये संख्यामासांस्तथैव च । विशीर्णा विदला ह्रस्वा वक्रा ससुषिरा कृशा ॥ अतिस्थूला च दीर्घा च समित्कार्य्यविनाशिनी । विशीर्ण्णाऽऽयुः क्षयं कुर्य्याद्विदला पुत्रनाशिनी ॥ प्रादेशान्नाधिका नोना समित्स्यात्सर्व्वकर्म्मणि ॥ गृह्यासंग्रहकारः ॥ ह्रस्वा मृत्युकरी रौद्री दुर्भगत्वञ्च वक्रया । विघ्नानि कुरुते स्थूला कृशा च रिपुवर्द्धिनी ॥ द्विधा नाशयते ह्यर्थं भार्य्यांञ्च प्रियबान्धवान् । कीटदष्टातिभयदा दीर्घाचैव सुतान् हरेत् ॥ तस्मात्सर्व्वप्रयत्नेन वर्ज्जनीयाश्च वर्ज्जयेदिति मुरारिमिश्र चन्द्रकान्तौ ।

[२] नाग्नि च पार्थिवोह्यग्निः प्राशने च शुचिस्तथा । सभ्यनामाऽथ चूडेति व्रतादेशे समुद्भवः । इति गृह्यासंग्रहः । सत्यनामेति तत्त्वकारः ॥ आदेशे उपदेशे ।

पञ्चाभिर्म्मन्त्रैः पञ्चाज्याहुतीर्ज्जुहुयात् । प्रजापतिर्ऋषिरग्निर्देवतोपनयनहोमे विनियोगः, ओं अग्ने[१]व्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् तेनर्ध्यासमिदमहमनृतात् सत्यमुपैमि स्वाहा ॥१॥ प्रजापतिर्ऋषिर्व्वायुर्देवतोपनयनहोमे विनियोगः, ओं वायो व्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा ॥२॥

[१] आचार्य्य कर्त्तृकोयमग्ने व्रतपत इत्यादिभिः पञ्चभिर्म्मन्त्रैर्होमः हुत्वाऽऽचार्य्योऽवतिष्ठेत इति गोभिलसूत्रे क्त्वासमन्वय बलात् । मन्त्रास्तु माणवकपठनीयाः मन्त्रलिङ्गात् । व्रतञ्चरिष्यामीत्युत्तमपुरुष प्रयोगाच्च । नच इदानीं वेदपाठस्य तस्य माणवकस्य अनधिकारः । उपनयन कर्म्म पूर्व्वमेव तथात्वात् नतूपनयनकर्म्मण्यपि । (अतएव) मेषलामन्त्रे तत्कर्त्तृक पाठस्य सर्व्वसम्मतत्वात् । अन्यपठितमन्त्रेण अन्यकर्त्तृक क्रियायाश्च अश्मारोहणादौ बहुत्रदर्शनात्र किञ्चिदेतत् । कौमुदीनारायणशूलपाणिहोरिलप्रभृतयोप्येवमिति मुरारिमिश्राः । एवमेव गोभिलभाष्ये चन्द्रकान्तोऽपि व्यवस्था चात्र सम्प्रदायानुसारेण कार्य्येति कर्म्मकाण्डोद्धारकः ।

प्रजापतिर्ऋषिःसूर्य्योदेवतोपनयनहोमे विनियोगः, ओं सूर्य्यव्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् तेनर्ध्यां समिदमहमनृतात्सत्यमुपैमि स्वाहा ॥३॥ प्रजापतिर्ऋषिश्चन्द्रोदेवतोपनयनहोमे विनियोगः, ओं चन्द्रव्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् तेनर्द्ध्यां समिदमहमनृतात्सत्यमुपैमि स्वाहा ॥४॥ प्रजापतिर्ऋषिर्व्रतपतिर्देवतोपनयनहोमे विनियोगः, ओं व्रतानां व्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयम् तेनर्द्ध्यां समिदमहमनृतात्सत्यमुपैमि स्वाहा ॥५॥ एवं होमं कृत्वाऽऽचार्य्यः पश्चादग्नेरुत्तराग्रेषु कुशेषु पूर्व्वाभिमुखऊर्द्ध्वस्थितो भवेत् । ततोऽग्न्याचार्य्ययोर्म्मध्ये माणवकआचार्य्याञ्जलेरुपरिकृताञ्जलिराचार्य्याभिमुखउत्तराग्रेषु कुशेषु तिष्ठेत् । ततस्तस्य दक्षिण(१)तोऽवस्था(२)य मन्त्रवानन्यो ब्राह्मणः कश्चिन्माणवकस्याञ्जलिमुदकेनापूर्य्य पश्चादाचार्य्यस्यापि पूरयेत् । ततो माणवकं प्रेक्षमाणआचार्य्योऽमुं मन्त्रं पठेत् ।

(१) माणवकस्य दक्षिणतो दक्षिणस्यां दिशि न तु दक्षिणपार्श्वे । कस्मात् । माङ्गलिकत्वात् । तस्मात् यथोदङ्मुखत्वं भवति तथाऽवस्थातव्यम् । दक्षिणपार्श्ववस्थाने ऽवस्थातुर्दक्षिणमुखतास्याच्चचामङ्गलमिति भाव्यम् ॥ (२) अवस्थाय ऊर्द्ध्वस्थित्वा ।

प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निवायुसवितृचन्द्रदेवता उपनयने माणवकं प्रेक्षमाणस्याचार्य्यस्य जपे विनियोगः, ओं आगन्त्रासमगन्महिप्रसुमर्त्यय्युँयोतन अरिष्टाः सञ्चरेमहि स्वस्तिचरतादयम् । अथाचार्य्योमाणवकय्यँजुरिदं पाठयेत्, प्रजापतिर्ऋषिराचार्य्योदेवतोपनयने माणवकवाचने विनियोगः, ओं ब्रह्मचर्य्यमागामुपमानयस्व ॥ अथ माणवकस्याचार्य्योदेवताश्रयं नामकृत्वा माणवकमिदं पृच्छेत् । प्रजापतिर्ऋषिर्म्माणवकोदेवतोपनयने माणवकनामप्रश्ने विनियोगः, ओं कोनामाऽसि । ततो माणवकः क्लृप्तं स्वकीयन्नामोच्चार्य्य उत्तरन्दद्यात् । प्रजापतिर्ऋषिर्म्माणवकोदेवतोपनयने माणवकनामकथने विनियोगः, ओं श्री विष्णुशर्म्मनामाऽस्मि । अथोदकाञ्जलिमुत्सृ(१)ज्याचार्योदक्षिणेन पाणिना माण(२)वकदक्षिणपाणिं साङ्गुष्ठं गृह्णीयात् मन्त्रान्ते

(१) उत्सृज्य त्यक्त्वा ।

(२) अत्राचार्य्यस्येव माणवकस्यापि जलाञ्जल्युत्सर्गोबोध्यः । कुतः, अविशेषेणोपदेशात् । अतएव माणवकस्य साङ्गुष्ठ दक्षिणमाञ्जस्येनोपपद्यते । 'सुकरत्वेनेत्यर्थः, मन्त्रपाठानन्तरं हस्तग्रहणं बोद्धव्यमिति भाष्यकारः ।

च सम्बोधनेन नाम प्रोक्तव्यम् । प्रजापतिर्ऋषिः सवित्रश्विपूषणोदेवता उपनयने माणवकसाङ्गुष्ठहस्तग्रहणे विनियोगः, ओं देवस्य ते सवितुः प्रसवेऽश्विनोर्ब्बाहुभ्यां पूष्णोहस्ताभ्यां हस्तं गृह्णामि श्रीविष्णुशर्म्मन् । इति गृहीत्वा जपति । प्रजापतिर्ऋषिरग्निसवित्रर्य्यमणोदेवता गृहीतमाणवकहस्तस्याचार्य्यस्य जपे विनियोगः, ओं अग्नि(१)-ष्टे हस्तमग्रहीत्सविताहस्तमग्रहीदर्य्यमाहस्तमग्रहीन्मित्रस्त्वमसि कर्म्मणाऽग्निराचार्य्यस्तव । अथैतद्देशस्थमेव माणवकं प्रदक्षिणमावर्त्तयेत् । प्रजापतिर्ऋषिः सूर्य्योदेवतोपनयने माणवकावर्त्तने विनियोगः, ओं सूर्य्यस्यावृतमन्वावर्त्तस्व श्रीविष्णुशर्म्मन् । ततो दक्षिणेन पाणिना माणवकदक्षिणांसमनुस्पृश्यानन्तर्हितान्नाभिमभिस्पृशेत् । प्रजापतिर्ऋषिर्न्नाभ्यन्तकौ देवते उपनयने ब्रह्मचारिनाभिस्पर्शने विनियोगः,

(१) इदानीं गृहीत माणवकहस्तस्याचार्य्यस्य 'अग्निष्टे'; (अग्निस्ते; इति वा पाठः) हस्तमग्रहीदिति मन्त्रजपो भवदेवभट्टाद्यनुमतः। प्रमाणन्तु मृग्यम्। मन्त्र ब्राह्मणे ऽप्यस्मिन्नवसरे मन्त्रोऽयं न पठ्यते, इति भाष्यकारः। रघुनन्दनस्त्वत्रैवपठतीति कर्म्मकाण्डोद्धारकः।

ओं प्राणानां ग्रन्थिरसि माविस्रसोऽन्तकइदन्ते परिददामि श्रीविष्णुशर्म्माणम् । ततोमाणवकस्य नाभिदेशोपरिदेशं स्पृशेदनेन । प्रजापतिर्ऋषिर्व्वायुर्द्देवतोपनयने ब्रह्मचारिनाभिदेशोपरिदेशस्पर्शने विनियोगः, ओं अहुरइदन्ते परिददामि, श्रीविष्णुशर्म्माणम् । ततो माणवकस्य हृदयं स्पृशेदनेन । प्रजापतिर्ऋषिः कृशानुर्द्देवतोपनयने ब्रह्मचारिहृदयस्पर्शने विनियोगः, ओं कृशनइदन्ते परिददामि श्रीविष्णुशर्म्माणम् । ततो दक्षिणेन पाणिना माणवकस्य दक्षिणांसमवलंब्य जपेत् । प्रजापतिर्ऋषिः प्रजापतिर्द्देवतोपनयने ब्रह्मचारिहृदयस्पर्शने विनियोगः, ओं प्रजापतये त्वा परिददामि श्रीविष्णुशर्म्मन् । ततो वामेन पाणिना वामांसं स्पृष्ट्वा जपेत् । प्रजापतिर्ऋषिः सवितादेवतोपनयने ब्रह्मचारिसव्यांसस्पर्शने विनियोगः, ओं देवायत्वा सवित्रे परिददामि श्रीविष्णुशर्म्मन् । अथैनं बोधयति, प्रजापतिर्ऋषिः ब्रह्मचारीदेवता ब्रह्मचारिसम्बोधने विनियोगः, ओं ब्रह्मचार्य्यसि श्रीविष्णुशर्म्मन् । प्रजापतिर्ऋषिर्ब्रह्मचारीदेवता ब्रह्मचारिप्रैषे विनियोगः, ओं समिधमाधेहि, ओं कर्म्मकुरु,

ओं मादिवाऽस्वाप्सीः । प्रतिप्रश्नश्च ब्रह्मचारिणा 'ओं' इति, बाढमिति वोत्तरन्देयम् । तत आचार्य्योऽग्नेरुत्तरतः प्राङ्मुखउदगग्रेषु कुशेषूपविशेत् माणवकश्च प्रत्यङ्मुखोभूगतदक्षिणजानुस्तथैव कुशेषूपविशेत् । अथैनमाचार्य्यस्त्रिरावृत्तां मेख-(१)-लां यथाप्रवरग्रन्थि प्रदक्षिणं परिधा-(२)-पयन् मन्त्रद्वयं पाठयेत, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो मेखला देवतोपनयने माणव-

(१) मेखलामिति । मेखला सप्तहस्तास्यादित्यादि । ततो गोभिलः मुञ्जकाशतामुन्योरशना इति । तमुनिः शणः । रशना मेखला अन्यत्पूर्व्ववत । मनुः, मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला । क्षत्रियस्य तु मौर्व्वी स्याद्वैश्यस्य शणतान्तवी ॥ मुञ्जालाभे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः । त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥ त्रिवृत्त्रयगुणी कृता । मुञ्जो दुधमरुरिति प्रसिद्धा । मौर्व्वी ज्या धनुर्गुणः । मुञ्जालाभे मुञ्जाद्यभावे, अश्मन्तकः कुशसदृशतृण विशेषः । वल्वजाः शावय इति प्रसिद्धाः । ग्रन्थौ प्रवरसाम्येन व्यवस्थितो विकल्पः । अर्थात् त्रिप्रवराणां त्रिप्रवरां । पंचप्रवराणां पञ्चग्रन्थियुक्तां मौञ्जीमेखलां कुर्य्यात् । इति शुभकर्म्मनिर्णयः । सूत्रे तु 'ताम्बल्यः, इति, भाष्ये तु 'तासून्यः, इति केचित्, उभयथाऽप्यर्थो न भिद्यते । शणएव ॥*॥ (२) परिधापयन्निति । अत्र गोभिलः । "अथैनं त्रिः प्रदक्षिणं मुंजमेखलां परिहरन् वाचयतीयं दुरुक्तात् परिबाधमानेस्यृतस्य गोप्त्रीति च, अस्य भाष्यम्" अनन्तरमेव उपरिष्टमेव । एनं माणवकं वाचयत्याचार्य्यः । किं वाचयति । इयं दुरुक्तादिति, ऋतस्य गोप्त्रीति च मन्त्रद्वय, किं कुर्व्वन् वाचयति । मुञ्जमेखलां तस्य कटिदेशे त्रिः प्रदक्षिणं परिहरन् प्रादक्षिण्येन वारत्रयं परिवेष्टयन् । परिहरन् इति वर्त्तमान निर्द्देशात् परिहरण समकालत्वं मन्त्र वाचनस्य । सत्यामपि परिहरणावृत्तौ सकृदेव मन्त्रपाठः स्यात । कस्मात् ! 'एकद्रव्य कर्म्मावृत्तौ सकृन्मन्त्र वाचनं कृत्वा, इति वचनात् । एवमेव कर्म्मकाण्डोद्धारकोऽपि ।

कवाचने विनियोगः, ओं इयन्दुरुक्तात्परिवाधमाना वर्णम्पवित्रं पुनतीम आगात् प्राणापानाभ्यां बलमाहरन्ती स्वसा देवी सुभगा मेखलेयम् । ओं ऋतस्य गोप्त्री तपसः परस्वीघ्नतीरक्षः सहमाना अरातीः सामासमन्तमभिपर्य्येहि भद्रे धर्त्तारस्ते मेखले मारिषाम ३। तत आचारात् कौपीनं परिधापयेत । तत आचम्य, माणवकः सपूगयज्ञोपवीतभाण्डा(१)ष्टतयं प्रत्येकं ब्राह्मणेभ्योदद्यात् । ततो यज्ञोपवीतं परिधा[२]पयेत् तत्र माणवकपठनीयोमन्त्रः । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोविश्वेदेवादेवता यज्ञोपवीतपरिधाने विनियोगः, ओं यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनो-

(१) भाण्डाष्टतयदानमप्याचारादेवेति कर्म्मकाण्डोद्धारकोऽपि ।

(२) "अस्मिन्नवसरे प्रसिद्धया यज्ञोपवीतमिच्छन्ति,, इति कर्कोपाध्यायः । "गृह्यानुक्तमपि यज्ञोपवीतमस्मिन्नेव समये परिधापयेत,, । "मेखलाऽनन्तरम्,, "कार्प्पासमुपवीतं,, स्यादिति मनूक्तेः । "पवित्रञ्चास्मै प्रयच्छति,, इति जातूकर्ण्यात् । यज्ञोपवीतिनं

कृत्वा, इति सांख्यायनाच्च, इति तिरवकारः। भवदेवभट्टप्रभृतयोऽप्येवमेव। तत्र, 'मेखलामजिनं दण्डमुपवीतं कमण्डलुम्। अप्सु प्राश्य विनष्टानि गृह्णीतान्यानि मन्त्रवत्, इति मनुनोपवीतग्रहणस्यापि मन्त्रवत्त्वाभिधानात् गृह्ये च तदनुपदेशात् शाखान्तरान्मन्त्रमुपाद्यात् "यज्ञोपवीतमसि,, इति भवदेवरघुनन्दनौ, इति चन्द्रकान्तः। एवमेव मैथिलानुसारि व्यवस्थाऽपि। तथा च गोभिलः। "यज्ञोपवीतं कुरुत सूत्रं वस्त्रं वाऽपि वा कुशरज्जुमेव,, कोदशान्ततत्, इत्याह सूत्रं सूत्रनिर्मितम् ॥ त्रिवृदूर्ध्ववृतं कार्य्यन्तन्तुत्रयमधोवृतम्। त्रिवृतश्चोत्तरीयं स्यात्तस्यैकोग्रन्थिरिष्यते, इति कात्यायनोक्त लक्षणकमित्यर्थ इति भाष्यम्। विशेषस्तु आचारात् हरिद्रादिरंजितम्।

पनह्यामि। तत ऐणे[१]यमजिनं परिदध्यादनेन। प्रजापतिर्ऋषिः शक्वरीच्छन्दोऽजिनन्देवतोपनयनेऽजिनपरिधाने विनियोगः, ओं मित्रस्य चक्षुर्द्धरुणम्बलीयस्तेजोयशस्विस्थविरं समिद्धम् अनाहनस्यव्वँसनञ्जरिष्णुपरीदं वाज्यजिनन्दधेऽहम्। ततो माणवकश्चाचार्य्यसमीपं गच्छेदेवम्ब्रुवाणः, "अधीहि भोः सावित्रीम्मे भवाननुब्रवीतु,, इति। अथाचार्य्योऽपि प्राक्[२]पादं,

(१) ऐणेयमजिनमिति तथा च गोभिलः। 'ऐणेय रौरवाजान्यजिनानीति, एतानि ब्राह्मणादीनाय्यँथाक्रमं अजिनान्युत्तरीयाणोत्यर्थः॥ तथा च स्मृतिः। उत्तरीयं समाख्यातं वासः कृष्णाजिनं शुभमिति। एवमेव पारस्करोऽपि तत्र गव्यं वा वैश्यस्येत्येव विशेषः। 'एणी कृष्णसारमृगी तस्याइदं ऐणेयम्' 'स्त्रीभ्योढगित्यनुशासनात्, इति मुरारिस्वरसः। यत्तु एणस्येदमैणेयमिति भाष्यकारस्वरसस्तदपि मुरारिणा तुच्छीकृतः। स्पष्टं चेदं शुभकर्म्मनिर्णये। रुरुर्गौरमृगः भंखार इति प्रसिद्धः। यमः "सर्वेषां रौरवाजिनम्, इतरासम्भवे" इति शेषः। स्मृतिः। मेखला सप्तहस्तास्यादजिनं च द्विहस्तकम्। वहिर्लोमत्र्यंगुलं च अखण्डं वा त्रिखण्डकम्। चतुर्विंशाग्रषोड़शांगुलैः खण्डानि कारयेत्। विकल्पस्तु। शक्त्यपेक्षया कुलकल्पापेक्षया चेति॥

(२) प्राक् पादमिति। गोभिलः। "तस्मा अन्वाह" पच्छोऽर्द्धर्चश ऋक्श इति। तस्मै माणवकाय अन्वाह अनुब्रूयात्, कामनुब्रूयात् सावित्रीम्। (सवितृ देवतां गायत्रीमित्यर्थ इति कर्म्मकाण्डो०) कथम्! प्रथमस्तावत्, पच्छः ऋचः पादं पादं कृत्वा। ततोऽर्द्धर्चशः कृत्वा तत ऋक्शः सर्व्वामृचम्। इति भाष्यकार व्याख्यानात्, इति। यदि माणवको यथावदस्मिन्नवसरे गायत्रीमध्येतुन्न शक्नुयात् तदा यथाशक्त्यध्यापयेत्। तथा चाश्वलायनगृह्यम्। 'सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्व्वाय्यँथाशक्ति वाचयीतेति, कर्म्मकाण्डोद्धारकाः॥

ततोऽर्द्ध. ततः समस्तां सावित्रीं तमध्यापयेत्, माणवकोऽपि तथैवाधीयीत। विश्वामित्रऋषिर्गायत्रीच्छन्दः सविता देवतोपनयने सावित्रीदाने विनियोगः, ओं तत्सवितुर्व्वरेण्यम्भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात्। ततः। महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्य्यादेवता उपनयने महाव्याहृतिदाने विनियोगः, ओं भू-[१]-रों, ओं भुवरों,

(१) ओं भूरोमित्यादि। सावित्रीदानानन्तरं। गोभिलः। 'महाव्याहृतीश्च विहृता ओंकारान्ताः, । अथास्य भाष्यम्। 'महाव्याहृतिश्च 'अन्वाह, इत्यनुषज्यते । कथम्भूताः विहृताः, विशेषेण हृताः पृथक् पृथक् कृताः । ओंकारान्ताः, ओङ्कारः प्रणवोऽन्ते यासां ता इमा ओङ्कारान्ताः, महाव्याहृतीः, इति कृत्वा। ओङ्कारान्ताः, इति करणात्तासामन्तएव ओङ्कारोऽवगम्यते । पठ्यमानमन्त्रकाण्डेऽपि, अस्मिन्नेवावसरे व्याहृतीनां परत एव, ओंकारः पठ्यते । तथा च भूः ओं, भुवः ओं, स्वः ओं इत्येवमनुब्रूयादिति भट्टनारायणोपाध्यायाः। (मुरारिमिश्रोऽपि) ओं भूः इत्यादि रूपमिति भवदेवभट्टाः। उभयमतानुरोधी वीरेश्वरोपाध्यायस्तु (पद्धतिकारः स्वपद्धतौ) ओं भूः ओं, इत्यादिरूपम इत्याहस्मेति ।

ओंस्वरों, इति व्याहृतीर्ब्रूयादध्यापयेच्च । अथाचार्य्यऋजुमाणवककेशान्तिकमव्रणं पालाशद[१]ण्डं प्रयच्छन्माणवकव्वाँचयेत्, प्रजापतिर्ऋषिः पङ्क्तिश्छन्दोदण्डाग्नीर्देवते उपनयने दण्डार्प्पणे विनियोगः, ओं सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवादेवेष्वेवमहं सुश्रवः सुश्रवा ब्राह्मणेषु भूयासम् । अथ माणवकोभैक्ष[२]ञ्चरेत् । तत्र प्रथमं मातरमेव

(१) दण्डमिति। गोभिलः। पार्णवैल्वाश्वत्थादण्डा इति। पार्ण: पालाशादयः क्रमेण ब्राह्मणादीनां दण्डाः प्रशस्ताः, इत्यर्थः। पारस्करे तु, औदुम्बरो वैश्यस्य सर्व्वे वा सर्वेषाम । एषामलाभे सर्वेषां सर्वे यज्ञिया, इति विशेषः । औदुम्बरः डूमरि इति प्रसिद्धः। तस्याय 'औदुम्बर इति कुलकल्पभेदेन, धारयेद्वैल्वपालाशौ दण्डौ केशान्तिकौ द्विजः । यज्ञार्हं वृक्षजं

वाऽथ सौम्यमव्रणमेव च ॥ मनुः। केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः। ललाटसम्मितोराज्ञः स्यात्तुनासासम्मितोविशः । ललाटोर्ध्वकेशजन्मस्थानस्यान्तः, केशान्तः । एवञ्च उद्‌र्ध्वस्थितस्य पुरुषस्य भूमितस्तत्पर्य्यन्तपरिमाणतो ब्राह्मणस्य दण्डः कार्य्यः । भ्रूमध्यसम्मितोराज्ञः । नासाग्रसम्मितो वैश्यस्येत्यर्थः। यत्तु कर्णसमीपमूलकेशमूलपर्य्यन्त (ब्राह्मणस्य दण्डः) इति कस्यचिद्व्याख्यानं, तन्न, तथासति ब्राह्मणक्षत्रिययोस्तुल्यपरिमाणत्वेन पृथगुपदेशानर्थक्यापत्तेरिति मुरारिमिश्राः।

[२] भैक्षमिति । 'अथ भैक्षञ्चरति' मातरमेवाग्रे द्वेचान्ये सुहृदौ यावत्यो वासन्निहिताःस्युः, इति गोभिलोक्तेः । भविष्यपुराणे। मातरं वा स्वसारं वा मातुर्व्वा भगिनीं निजाम् । भिक्षेत भिक्षां प्रथमं याचैनं न विमानयेत् ॥ सुवर्णं रजतं रत्नं सापात्रेऽस्य विनिः क्षिपेत्। एतेन मातरं प्रथमं भिक्षेत्। ततः स्वसारम्। ततो मातुर्निजा सोदर्य्यामित्यर्थः, एवमेव पूर्व्वपूर्व्वाभावे, उत्तरोत्तरक्रमोऽपि । भिक्षावाक्ये मनुः । भवत्पूर्व्वञ्चरेद्भैक्षमुपनीतो द्विजोत्तमः । भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम । एतेन 'भवति भिक्षान्देहि, इति वाक्येन ब्राह्मणः । अन्यत्सुगमम्। तथा च हारीतः। सप्ताक्षरां चरेद्भिक्षां क्षाञ्च हिञ्च न वर्ज्जयेत्। इत्युक्तेश्च। तथा। आदिमध्यान्तेषु भवच्छब्दः प्रयोज्योवर्णानुपूर्व्येणेति, गौतमसूत्राच्च इति। हस्तदत्ता भिक्षा न ग्राह्या। हस्तदत्ता च या भिक्षा सलिलं व्यञ्जनानि च । भोक्ता त्वशुचितां याति दाता स्वर्गञ्च गच्छति, इति यमवचनात्पात्रस्थितामेव भिक्षां गृह्णीयात्। आचारोऽपि तथैव ॥

भिक्षाय्याँचेत । भवति भिक्षां देहि, इति तदन्तरमन्या अपि यथासम्भवय्याँचितव्याः।

भैक्षञ्चाचार्य्याय समर्प्पयेत् । अथ समिदाधानय्यँदि तस्मिन्नेव क्षणे क्रियते तदा तत्रैवाग्नावाचारात्कर्त्तव्यम् । अथ सन्ध्यामुपास्यास्तङ्गते सवितरि यदि क्रियते तदा कुशण्डिकामनुसन्धाय व्याहृतिहोमं कृत्वा प्रयोगः, प्रथमं समन्त्रां समिधमाधाय, प्रजापतिर्ऋषिरग्निर्द्देवताऽग्नौ समिदाधाने विनियोगः, ओं अग्नये समिधमाहार्षम्बृहते जातवेदसे यथा त्वमग्ने समिधासमिध्यस्येवमहमायुषा मेधया वर्च्चसा प्रजया पशुभिर्ब्रह्मवर्च्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा । अपरां समिधममन्त्रां क्षिपेत् । ततो वामदेव्यगानान्तं तन्त्रं समापयेत्, तत्रोपनयने प्रयोगः । आचार्य्यो व्याहृतिहोमङ्कुर्य्यात् । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्द्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दस्सविता देवता व्याहृतिहोमे विनियोगः, ओं स्वः स्वाहा । प्रजापतिर्ऋषिर्बृहतीच्छन्दोबृहस्पतिर्द्देवता महाव्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः

स्वाहा । अधुना यदि शाठ्यायनहोमः क्रियते तदा पद्धतिशेषेऽन्वेष्टव्यः । ततः प्रादेशमितां समिध (१) स्तूष्णीमग्नौ क्षिपेत् । पुनरग्नौ पर्य्युक्षणादि कुर्य्यात् । प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सवितादेवताऽग्निपर्य्युक्षणे विनियोगः, ओं देवसवितः प्रसुवयज्ञं प्रसुवयज्ञपतिम्भगाय दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु । इति होमीयद्रव्यसहितस्याग्नेर्व्वारिधारया वेष्टनं कुर्यात । प्रजापतिर्ऋषिरदितिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अदिते अन्वमंस्था, इति दक्षिणतः । प्रजापतिर्ऋषिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अनुमते अन्वमंस्था, इति पश्चात् । प्रजापतिर्ऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने विनियोगः, ओं सरस्वत्यन्वमंस्था, इत्युत्तरतः पूर्व्वविपरीतार्व्वारिधारां दद्यात् । ततोदर्भ-

(१) समिदादिषु होमेषु मन्त्रदैवत वर्जिता । पुरस्ताच्चापरिष्टाच्च इन्धनार्थं समिद्भवेत् । इति कर्म्मप्रदीपोक्तेरेवं सर्व्वत्र समिद्धोमे तूष्णीं बोध्यम् ॥

जूटिकाम्बद्ध्वा, प्रजापतिर्ऋषिर्व्वयोदेवता दर्भतृणाभ्यञ्जने विनियोगः, ओं अक्तंरिहाणा-व्यन्तुवयः। इत्यग्रमध्यमूलक्रमेण घृताक्ताञ्जलेनाभ्युक्ष्याग्नौ क्षिपेदनेन, प्रजापतिर्ऋषिरनुष्टु-प्छन्दोरुद्रोदेवता दर्भजूटिकाहोमे विनियोगः, ओं यः पशूनामधिपतीरुद्रस्तन्तिचरोवृषा पशूनस्माकम्माहिंसीरेतदस्तु हुतन्तव स्वाहा। ततउत्थाय ब्रह्मचारिकरस्पृष्टस्रुवेण घृतपुष्प-फलसहितां पूर्णाहुतिं दद्यात। प्रजापतिर्ऋषिर्व्विराड्गायत्रीच्छन्द इन्द्रोदेवता यशस्कामस्य-यजनीयप्रयोगे विनियोगः, ओं पूर्णहोमय्यँशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरव्वृँणे यशसा भामिलोके स्वाहा। ततः, ओं वसुभ्यः स्वाहा, इत्यविच्छिन्नामाज्यधारान्दद्यात्। ततो ब्रह्मदक्षिणा। ओं अद्य कृतैतदुपनयनहोमकर्म्मणि कृताकृतावेक्षकाय ब्रह्मणे इदं(१)पूर्णपात्रं

(१) पूर्णपात्रमिति। गोभिलः। 'कंसं चमसं वाऽन्नस्य पूरयित्वा कृतस्य वाऽकृतस्य वापि वा फलानामेवैत पूर्ण्णपात्र इत्याचक्षत, इति। कंसं कांस्यपात्रम्। चमसं वानस्पत्यं पात्रम् अन्नस्येत्यादि षष्ठी तृतीयार्थे॥ अन्नपरिमाणमधिकृत्य कात्यायनः। यावता बहुभोक्तुश्च तृप्तिः पूर्णेन जायते। नावरार्ध्यमतः कुर्यात्पूर्ण्णपात्रमिति स्थितिः॥ गृह्यासंग्रहे

स्वङ्गिरा। चतुर्मुष्टिर्भवेत्कुञ्चिश्चतुः कुञ्चिस्तु पुष्कलम्। पुष्कलानि च चत्वारि पूर्ण्णपात्रमुदाहृतम्। एवं चात्र शक्त्यपेक्षया व्यवस्थेति शुभकर्म्मनिर्णयः॥ भाष्ये तु 'अष्टमुष्टिर्भवेत्कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्। पुष्कलानि च चत्वारि पूर्ण पात्रं विधीयत इति गृह्यासंग्रहोक्तं पूर्ण्णपात्रं इति दृश्यते, तथा पूर्ण्णपात्रो मृत्पात्रमेव बहुस्थले दृश्यते तदपि शक्त्याशक्त्यपेक्षया इदानीन्तनदेशाचारापेक्षया च व्यवस्थेयेतिदिक्। कृतं ओदनसक्त्वादि। कृताकृतं तण्डुलादि, अकृतव्व्रीह्यादि। फलानामेवेति एवकारश्रवणात् आम्रबदरादीनां ग्रहणम्। नत्वज्जुर्नाद्यभक्ष्यफलानामित्यर्थः॥

प्रजापतिदैवतं दक्षिणां दातुमहं समुत्सृज्ये। ततोऽग्निप्रदक्षिणेन हस्तन्नीत्वा ब्रह्मोत्थापनम् कुशरचितब्रह्मग्रन्थिविमोकव्वाँ कुर्य्यात्। अथ स्रुवलग्नभस्मना त्र्यायुषकरणम्, ओं त्र्यायुष-ञ्जमदग्नेः, इति हृदि। ओं कश्यपस्य त्र्यायुषम्, इति दक्षिणबाहुमूले। ओं अगस्त्यस्य त्र्या-युषम्, इति वामबाहुमूले। ओं यद्देवानां त्र्यायुषन्तन्मे अस्तु त्र्यायुषम्, इति शिरसि विन्दुं कुर्य्यात्। एवं माणवकेऽपि तत्र 'तन्मे' इत्यस्य स्थाने 'तत्ते, इति विशेषः। ततः पात्रस्थ जलमपनीय सपुष्पजलेनापूर्य्य दक्षिणान्दद्यात, ओं अद्य कृतैतदुपनयन[१]कर्म्मप्रतिष्ठार्थं

(१) इयञ्च दक्षिणा उपनयन कर्म्मण एव नतूपनयन व्रतस्य । कुतः । उपनयन कर्म्मणोऽनन्तरम्, "आचार्य्याय वरोदक्षिणा,, इति गृह्यान्तर सूत्रणादिति भाष्यम् ॥

गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणान्दातुमहं समुत्सृज्ये । ततः पूर्व्ववद्वामदेव्यगानम् । उपनीतश्चाहोरात्रत्रयमक्षारलवणं भुञ्जीत ॥ इत्युपनयनकर्म्म समाप्तम् ॥ ❀ ॥

अथ समावर्त्तनसमयएव प्रथमं सवितृदेवताकमोदन चरुं कुर्य्यात् । तत्रोदूखलमुसले शूर्प्पञ्च प्रक्षाल्याचार्य्यः प्राङ्मुखउपविष्टः कुशप्रच्छादितमुदकमानीय, गोमयोदकेनोपलिप्तदेशं कुशैः परिसमुह्य जलेनाभ्युक्ष्य[१]फलपुष्पकुशानामन्यतमं गृहीत्वाऽग्निस्थापनपर्य्यन्तं वामहस्तं भूमौ निधाय रेखापञ्चकं कुर्य्यात् । तत्र प्रथमं पूर्व्वाग्रा द्वादशाङ्गुलप्रमाणा पृथिवीदेवताकाध्येय पीतवर्णा लेखा लिखितव्या, तल्लेखा पश्चिम भागसंलग्ना उत्तराग्रा एकविंशत्यङ्गुलप्रमाणाऽग्निदेवता

(१) अभ्युक्ष्येति । 'उक्षसेचने, इति व्याकरणादाभिमुखेनेति शेषः । तथा 'उत्तानेनैव हस्तेन प्रोक्षणं समुदाहृतम् । न्यञ्चाताभ्युक्षणं प्रोक्तं तिरश्चाधोक्षणं मतमिति, स्मृत्यन्तरोक्तवचनेन सिद्धे दिति भाष्यकारः । न्यञ्चतेति अधोमुखेनेत्यर्थः ॥

काध्येय लोहितवर्णा लेखा लिखितव्या, एतल्लेखासंलग्ना पूर्व्वाग्रलेखातः षड़ङ्गुलान्तराला पूर्व्वगामिनी प्रादेशप्रमाणा प्रजापतिदेवताकाध्येय कृष्णवर्णा लेखा लिखितव्या, तस्याअपि षड़ङ्गुलान्तराला पूर्व्वगामिनी प्रादेशप्रमाणा इन्द्रदेवताकाध्येय नीलवर्णा लेखा लिखितव्या, तस्याअपिषड़ङ्गुलान्तराला पूर्व्वगामिनी द्वादशा[१]ङ्गुलप्रमाणा सोमदेवताकाध्येय शुक्लवर्णा लेखा लिखितव्या । एवं लेखापञ्चकं कृत्वा ताभ्योमृदः खनित्वा ऐशान्यां क्षिपेत् । ततोरेखाऽभ्युक्षणं कृत्वा कांस्यभाजनोपनीतेऽग्नौ ज्वलत्तृणन्निरस्यत्यनेन, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्द्देवताऽग्निसंस्कारे विनियोगः, ओं क्रव्यादमग्निं प्रहिणोमि दूरय्यँमराज्यं गच्छतु रिप्रवाहः । ततः, प्रजापतिर्ऋषिर्ब्बृहतीच्छन्दोवृहस्पतिर्द्देवताऽग्निस्थापने विनियोगः, ओं भूर्ब्भुवःस्वः, इत्यभिमुखमग्निम्प्रणयेत् । ततोऽञ्जलिम्बद्ध्वा, ओं इहैवायमितरो जातवेदादेवेभ्यो-

(१) क्वचिदत्र प्रादेश प्रमाणा चापि, एवं शुक्लवर्णा स्थाने पीतवर्णाऽपि, तत्प्रमाणन्तु भाष्ये द्रष्टव्यम् ।

हव्यव्वँहतु प्रजानन् । इत्यग्नेरुपस्थानम् । ततः पातितदक्षिणजानुः प्रादेशमितां समिधमग्नौ तूष्णीं क्षिपेत् । ततो ब्राह्मणपक्षे ब्रह्मवरणम्, ओं अद्य मत्कर्त्तव्य ससावित्रचरुहोमसमावर्त्तन-होमकर्म्मणि कृताकृतावेक्षकब्रह्मत्वेनैभिः पुष्पचन्दनताम्बूलयज्ञोपवीताङ्गुरीयकवासोभिरमुकगोत्र-ममुकशर्म्माणं ब्राह्मणन्त्वामहम्वृणे, इति वृणुयात् । ओं वृतोऽस्मि, इति प्रतिवचनम् । ओं यथाविहितङ्कर्म्मकुरु । ओं करवाणि, इति प्रतिवचनम् । ततोऽग्रेणाग्निं परिक्रम्याग्नेर्द्दक्षिणतोऽ-वस्थाय ब्रह्मासने पूर्व्वाग्रान्वँरिधारान्दत्वा तस्याउपरि प्रागग्रान्कुशानास्तीर्य्य प्रत्यङ्मुखस्तिष्ठन् वामहस्ताङ्गुष्ठानामिकाभ्यां ब्रह्मासनाद्दर्भमेकं गृहीत्वा नैर्ऋत्यां क्षिपेदनेन, प्रजापतिर्ऋषिर-ग्निर्द्देवता तृणनिरसने विनियोगः, ओं निरस्तः परावसुः । तत उदकमुपस्पृश्य, प्रजापति-र्ऋषिरग्निर्द्देवता ब्रह्मोपवेशने विनियोगः, ओं आवसोः सदने सीद, ओं सीदामीति प्रतिवच-नम् । ततस्तदुपरि कुशान्दत्त्वा जलेनाभ्युक्ष्य ब्रह्माणं स्पृष्ट्वा जपति । प्रजापतिर्ऋषि-

समावर्त्तन

र्ग्गायत्रीच्छन्दोविष्णुर्द्देवता जपे विनियोगः, ओं इदव्विँष्णुर्व्विचक्रमे त्रेधानिदधे पदम् समूढ-मस्य पाँसुले, इति जपित्वा तेनैव पथा परावृत्य स्वस्थानं गच्छेत् । अब्राह्मणपक्षे वरणप्रति-वचनवर्ज्जं सर्व्वङ्कुर्य्यात् । ततोऽग्नेः पश्चादुदूखलतटे पूर्व्वाग्रान् कुशानास्तीर्य्य तदुपर्य्युदूखलमुसले शूर्पञ्च स्थापयेत् । ततो व्रीहीन्यवान्वा कांस्येन चरुस्थाल्या वा उदूखले क्षिपेदनेन, ओं सवित्रे त्वा जुष्टन्निर्व्वपामि, द्विस्तूष्णीम् । तत उपरिकृतदक्षिणहस्तः पाणिभ्या-व्वाँरत्रयमवघातं कुर्य्यात् । ततो वारत्रयं शूर्पेण विरचय्य त्रिः फलीकृतास्तँण्डुलाँस्त्रिष्प्रक्षाल्य स्थाल्यामुदगग्रे पवित्रे उदकञ्च निधाय प्रक्षिपेत् । स्थालीप्रमाणं प्रादेशमात्रं तिर्य्यगूर्ध्वम् । ततः प्रादेशप्रमाणेन पलाशमेक्ष-(१)-णेन प्रदक्षिणञ्चालयन् पचेत्, शृते सति स्रुव-

(१) मेक्षणेनेति । गृह्यासंग्रहे । प्रादेशमात्रं कुर्व्वीत मेक्षणं समिधस्तथा । इध्मः समानवृक्षाणां द्विप्रादेश प्रमाणतः । इति । मेक्षणं समिधश्च प्रादेशमात्रं कुर्य्यात् । इध्मस्तु द्विप्रादेशप्रमाणतः कर्त्तव्यः । सचायमिध्मः समान जातीयानां वृक्षाणां (सम्बन्धलक्षणा षष्ठी) करणीयः । इति । तथा च मेक्षणमपि स्रुवकृलुवादिवत् काष्ठनिर्म्मितम् । विशेषस्तु कर्म्मप्रदीपे ।

समावर्त्तन

इध्मजातीयमिध्मार्द्ध प्रमाणं मेक्षणम्भवेत् । वृत्तश्चांगुष्ठ पृथ्वग्रमवदान क्रियाक्षमम । एषैव दर्व्वी यस्तत्र विशेषस्तमहं ब्रुवे। दर्व्वी द्व्यंगुलपृथ्वग्रा तुरीयोनन्तु मेक्षणमिति गृह्यासंग्रहभाष्ये ।

गृहीतेनाज्येनाभिघार्य्य उत्तरस्यान्दिश्यवतार्य्य घृतेन पुनरभिघारयेत । ततो दक्षिणञ्जानु निपात्योपरिकृत दक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भूमिजपं कुर्य्यात् । परमेष्ठिऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता भूमि-जपे विनियोगः, ओं इदम्भूमेर्भजामह इदम्भद्रं सुमङ्गलम् परासपत्नान्वाधस्वान्येषाविँन्दते धनम् । ततो दक्षिणहस्तेन कुशत्रयमादायाग्नेरुत्तरादितः प्रदक्षिणक्रमेण प्रत्यृचं परिसमूहयेत् । कौत्सऋषिर्ज्जगतीच्छन्दोऽग्निर्द्देवता पृष्ठस्य षड़हस्य षष्ठेऽहन्यग्निमारुते शस्ते परिसमूहने विनियोगः, ओं इमं स्तोममर्हते जातवेदसे रथमिवसम्महेमामनीषया भद्राहिनः प्रमतिरस्यसंसद्यग्ने सख्ये मारिषामावयन्तव, इत्युत्तरतः । ओं भरामेध्मङ्कृणवामा हवींषि ते चितयन्तः पर्व्वणापर्व्वणावयम् जीवातवे प्रतरां साधयांधियोऽग्ने

सख्येमारिषामावयन्तव, इति पूर्व्वतः । ओं शकेमत्वा समिधं साधया धियस्त्वे देवाहविरदन्त्याहुतम् त्वमादित्याँ २॥ आवहताँ २॥ ह्युशमस्यग्ने सख्ये मारिषामावयन्तव, इति दक्षिणतः परिसमुह्य बर्हिर्भिरग्रैर्म्मूलान्याच्छादयन् त्रिरावृत्तं पञ्चावृत्तं वा पुरस्ताद्दक्षिणत उत्तरतः पश्चात्परिस्तरणं कुर्य्यात् । ततोबर्हिषिस्थालीपाकमासाद्य मूलमध्याग्रक्रमेण घृताक्तां द्विप्रादेशमितान्विंशतीध्मान्प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात् । ततः स्तृतादेव बर्हिषः साग्रकुशपत्रद्वयं गर्भरहितं प्रादेशमात्रं कृत्वा कुशमन्तर्द्धाय छिन्द्याद्नेन, प्रजापतिर्ऋषिः पवित्रे देवते पवित्रसम्मार्ज्जने विनियोगः, ओं विष्णोर्म्मनसा पूतेस्थः, इति सम्मृज्याज्यस्थाल्यामुदगग्रे पवित्रे धृत्वाऽऽज्यमावपेत् । ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां गृहीतपवित्राभ्यामाज्यमूर्द्ध्वन्नीत्वा, प्रजापतिर्ऋषिराज्यन्देवताऽऽज्योत्पवने विनियोगः, ओं देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिः, इत्यग्नौ वारमेकं जुहुयात्, द्विस्तूष्णीम् । ततो जलेन पवित्रे

सम्मृज्य तूष्णीमग्नौ क्षिपेत्। तत आज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायोत्तरान्दिशव्वाँरत्रयमवतारयेदित्याज्यसंस्कारः। एवं स्रुवसंस्कारो-[१]-ऽपि। ततः पातितदक्षिणजानुरग्नेः पर्य्युक्षणं कुर्य्यात। प्रजापतिर्ऋषिरदितिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अदिते अनुमन्यस्व, इत्यग्नेर्द्दक्षिणतोऽञ्जलिधारां पूर्व्वाग्रां दद्यात्। प्रजापतिर्ऋषिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अनुमते अनुमन्यस्व, इति पश्चादुत्तराग्राम्। प्रजापतिर्ऋषिः सरस्वतीदेवतोद-

(१) स्रुवनिर्म्माणय्यँथा ग्रहयागपद्धतौ। खादिरन्तु स्रुवं विद्याच्चतुर्व्विंशाङ्गुलं बुधः। चतुर्थांशेन पाणिःस्यात्तावतौ कलशौस्मृतौ। सभूषणौ भागयुगे गण्डीकार्या सुवर्त्तुला। एकाङ्गुलोऽथ कण्ठःस्यात्ततस्त्र्यंगुलहानियुक्। हस्तानि कुब्जांगुलिको मध्यं दिनकराकृतिः समीपाङ्गुलिसङ्घँ ग्राम्यतस्तोऽङ्गुलयोऽन्तरे। बहिःकिञ्चिद्विभिन्नास्युरंगुष्ठस्तल संस्थितः। अनामिका मध्यपर्व्वोर्द्ध्वाधोरेखा गतम्भवेत्। पवित्राङ्गुलीयश्च पाणेस्तलगतम्भवेत्। अंगुष्ठपृष्ठसङ्घँ ग्रम्पुष्करन्नखतःपृथक्। तन्मध्ये निखनेत्कूपं कर्षाज्यग्रहणक्षमम्। कलशौ तत्र कर्त्तव्यौ मणिबन्धे परान्तिके। प्रथमं त्र्यंगुलं विद्याद्द्वितीयं चतुरंगुलम्। तयाःपार्श्वेषु कार्य्याणि कङ्कणानि विशारदैरिति म० म० हर्षनाथविरचित 'संस्कारदीपक' धृत वचनैर्हस्तमात्रोहस्ताकृतिरनामिका मूललग्नांगुष्ठांगुलिकः स्रुवः, इति सिद्धम्। 'नतु स्रुवाग्रे घ्राणवत्खातमित्यादि मुरारिमिश्र तथा केशवमिश्रादिधृत गृह्यसंग्रहे कर्म्मप्रदीपाद्युक्तः। आधुनिकपरम्पराचार विरोधाच्च।

काञ्जलिप्रसेचने विनियोगः, ओं सरस्वत्यनुमन्यस्व, इत्युत्तरतः पूर्व्वाग्राम्, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सवितादेवताऽग्निपर्युक्षणे विनियोगः, ओं देवसवितः प्रसुवयज्ञम्प्रसुवयज्ञपतिं भगाय दिव्योगन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु, इति होमीयद्रव्यसहितस्याग्नेर्व्वारिधारया वेष्टनं कुर्य्यात। ततो जानूत्थाप्य समित्कुशफलपुष्पं गृहीत्वोपरिकृतदक्षिणहस्तो-विरूपाक्षं जपेत्। परमेष्ठिऋषीरुद्ररूपोऽग्निर्द्देवता विरूपाक्षजपे विनियोगः, ओं तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्याञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्वञ्च वाक्च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों महान्तमात्मानं प्रपद्ये विरूपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्यापर्णे गृहान्तारिक्षे विमितं हिरण्मयन्तद्देवानां हृदयान्ययस्मये कुम्भे अन्तः सन्निहितानि तानि बलभृच्च बलसाच्च रक्षतोऽप्रमनीअनिमिषत्तसत्यय्यँत्ते द्वादशपुत्रास्ते त्वा सव्वँत्सरे सव्वँत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वन्देवेषु ब्राह्मणोऽस्यहम्मनुष्येषु ब्राह्मणोवै

ब्राह्मणमुपधावत्युपत्वा धावामि जपन्तम्मामाप्रतिजापीर्ज्जुह्वन्तम्मामाप्रतिहौषीः कुर्व्वन्तम्मामा-प्रतिकार्षीस्त्वाम्प्रपद्ये त्वया प्रसूतइदं कर्म्म करिष्यामि तन्मे राध्यतान्तन्मे समृध्यतान्तन्मउप-पद्यतां समुद्रोमाविश्वव्यचा ब्रह्माऽनुजानातु तुथोमा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रोमा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः, इति कुशमैशान्यां त्यक्त्वा फलपुष्पं ब्रह्मणे निवेद्य दक्षिणञ्जानु निपात्य घृताक्तां समिधमग्नौ तूष्णीं क्षिपेत्। ततस्तस्या-ग्नेः पश्चाद्ब्रह्मचारिणन्निवेश्य व्याहृतिहोमं कु(१)र्य्यात्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्नि-

(१) होमावसरे वह्नेर्जिह्वादिकं ध्येयम्। सप्तजिह्वाभवन्त्येता हुताशनमुखोद्गताः। याभिर्हव्यं सदाश्नन्ति हुतं सम्यग्द्विजोत्तमैः। पावकस्य मुखं वक्ष्ये यदुक्तं पद्मयोनिना। सप्तजिह्वा प्रमाणन्तु प्रादेशं परिकीर्त्तितम्। प्रमाणं चतुरस्रं च वर्त्तुलम्मुख-मण्डलम्॥ कराली धूमिनी श्वेता लोहिता महालोहिता। सुवर्णा पद्मरागा च सप्तैताः परिकीर्त्तिताः॥ करालीं राक्षसा-श्नन्ति धूमिनीमसुरास्तथा। श्वेतां नागाः समश्नन्ति पिशाचा लोहितान्तथा॥ महालोहितां गन्धर्व्वा सुवर्णाञ्च यमास्तथा।

पद्मरागान्तथा देवाः ख्याताजिह्वा हुताशने॥ एताश्लोकाः समासेन ज्ञातव्यास्तु द्विजोत्तमैरिति गृह्यासंग्रह वचनात्। करालीमित्यादौ तृतीयार्थे द्वितीया। एवं च व्याहृतिहोमान्तामाद्य कुशण्डिकां कृत्वा, प्रकृत कर्म्मान्ते पुनर्व्याहृति होमः कार्य्यः 'उपरिष्टाच्चेति' सूत्रादेवेति शुभकर्म्मनिर्णयः।

र्द्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिकछन्दोवायुर्द्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः सवितादेवता व्याहृतिहोमे विनियोगः, ओं स्वः स्वाहा। प्रजापतिर्ऋषिर्बृहतीच्छन्दो वृहस्पतिर्द्देवता महाव्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः स्वाहा। तत पश्चाद्रोचननाम्नोऽग्नेश्चरु-न्निधाय, तत्र चरौ स्रु(१)वेण घृतं क्षिपेत्। ततश्चरौ मेक्षणेन पूर्व्वाग्ररेखाद्वयञ्च कुर्य्यात् तेन

(१) अथ (होमादि सकल कार्य्येषु) स्रुवधारण प्रकारो यथा मत्स्यपुराणे। मूले हानिकरम्प्रोक्तं मध्ये शोककरं तथा। अग्रे व्याधिकरं प्रोक्तं स्रुवं धारयते कथम्॥ कनिष्ठाङ्गुलि मानेन चतुर्विंशतिकाङ्गुलम्। चतुरङ्गुलम्परित्यज्य अग्रे चैव द्विरष्टकम्॥ चतुरङ्गुले च तन्मध्ये धारयेच्छंखमुद्रया। हीयते यजमानोवै स्रुवमूलस्य दर्शनात्॥ तस्मात्संगोपयेन्मूलं होमकाले स्रुवस्य तु। द्विरष्टकम् अष्टकद्विगुणम् षोडशमित्यर्थः। शुभकर्म्मनिर्णये स्मृतिः। अग्निः सोमस्तथा सूर्य्यो

रुद्रश्चैव प्रजापतिः । षष्ठश्चैव यमोदेवः स्त्रु वे तिष्ठन्ति सर्व्वदा ॥स्त्रु वाग्रे वसते वह्निर्विभागश्चतुरंगुलः । अग्निस्थानेऽग्नि-सन्तापः सोमे क्लेशउदाहृतः । सूर्य्ये पशुविनाशस्तु शैद्रे रौद्रभयम्भवेत् ॥ प्रजापतौ प्रजावृद्धिर्य्यमे मृत्युभयम्भवेत् । अय भागं त्यजेन्मूलं षोड़शाङ्गुलमग्रतः ॥ प्रजापतौ स्त्रुवं धार्य्यं सर्व्वकामसमृद्धये, इति । स्त्रुवमित्यस्य नपुंसकत्व छान्दसम् । अयं भावः । कनिष्ठाङ्गलिमानेन चतुर्विंशाङ्गुल स्त्रुवस्य चतुश्चतुरङ्गुलैः षर्ड्भागेन चतुर्विंशाङ्गलत्वम् सिद्ध्यति । तत्रास्त्रक्रमेण अग्नि सोम सूर्य्यरुद्र प्रजापति यमाः एतेषट् क्रमशः प्रत्येकेन तिष्ठन्ति । एवश्चतुरङ्गुलात्मकं यम भागं प्रथमं त्यक्त्वा द्वितीयश्चतुरङ्गुलात्मकं प्राजापत्यं धारयेदित्यर्थः, एवं सति अस्ततोऽपि षोड़शाङ्गुलात्मकं भागचतुष्कं अग्निसोम-सूर्य्यरुद्रात्मकं त्याज्यमनिष्टश्रवणात् । एवमेव मुरारिः ॥

नवधा विभक्तोभवति, ततो वारचतुष्टयं स्त्रुवेणाज्यं गृहीत्वा स्त्रुचि निधाय, ओं अग्नये स्वाहा । इत्यग्नेरुत्तरभागे प्राग्गतं स्त्रुचैव जुहुयात् । पुनरपि वारचतुष्टयं स्त्रुवेणाज्यं गृहीत्वा स्त्रुचि निधायाग्नेर्द्दक्षिणभागे स्त्रुचैव जुहुयात् । ओं सोमाय स्वाहा । ततः स्त्रुचि स्त्रुवेण घृतन्दत्त्वा चरोर्म्मध्यभागात्पूर्व्वभागादपि मेक्षणेन हविरवदाय स्त्रुचि कृत्वा, पुनः स्त्रुवेण स्त्रुचि घृतन्दत्वाऽव-दानस्थानद्वयं घृतेन पूरयित्वाऽग्नेर्म्मध्यभागे स्त्रुचैव जुहुयात् । ओं सवित्रे स्वाहा । ततः स्त्रुचि

स्त्रुवेण घृतन्दत्वा, चरोरैशान्यां मेक्षणेन प्रचुरं हविरवदाय स्त्रुचि निक्षिप्य वारद्वयं स्त्रुवेण घृतन्दत्वाऽग्नेरैशान्यां स्त्रुचैव जुहुयात् । ओं अग्नये स्विष्टकृते स्वाहा । एषचतुरवत्तिनाश्चरु-प्रयोगः ॥ पञ्चा(१)वत्तिनान्तु पञ्चधा गृहीतमाज्यं स्त्रुचि कृत्वाऽग्नेरुत्तरतः प्राग्गतं जुहुयात् । ओं अग्नये स्वाहा । पुनरपि पञ्चगृहीतमाज्यं स्त्रुचि कृत्वाऽग्नेर्द्दक्षिणतः प्राग्गतं स्त्रुचैव जुहुयात् । ओं सोमाय स्वाहा, ततः स्त्रुचि स्त्रुवेण घृतन्दत्वा चरोर्म्मध्यभागात्पूर्व्वभागात्पश्चार्द्धाच्च वारत्रयं मेक्षणेन हविरवदाय स्त्रुचि कृत्वा, पुनः स्त्रुवेण स्त्रुचि घृतन्दत्वाऽवदानस्थानानि घृतेनापूर्य्याग्नि-मध्ये स्त्रुचा जुहुयात् । ओं सवित्रे स्वाहा । ततः स्त्रुचि स्त्रुवेण वारद्वयं घृतं दत्वा चरोरैशान्यां मेक्षणेन प्रचुरं हविरवदाय स्त्रुचि निः क्षिप्य वारद्वयं स्त्रुवेण घृतन्दत्वाऽग्नेरैशान्यां स्त्रुचैव जुहुया-

(१) गोभिलभाष्ये । जामदग्न्या विदावत्सा वार्ष्टिषेणास्तथैवच । भार्गवाश्च्यवना और्व्वाः पञ्चावत्तिन ईरिताः । तेनैतद्भिन्नाश्च-तुरवत्तिन इति । अवदत्तान्यवदानानि पंचावत्तान्यहन्तीति पञ्चावत्तिन इति । एवमेव कर्म्मकाण्डोद्धारकस्वरसः ।

त्। ओं अग्नये स्वि(१)ष्टकृते स्वाहा। इति पञ्चावत्तिप्रयोगः॥ यद्यपि चतुरवत्तीयजमानस्तथाऽपि पञ्चावत्तैव वपाकार्य्येति न्यायादुभयमपिलिखितम् । ततस्तूष्णीमग्नौ मेक्षणप्रक्षेपः। ततो (२)व्याहृतिहोमः। प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप्छन्दः, सवितादेवता व्याहृतिहोमे विनियोग,ः ओं स्वः स्वाहा। प्रजापतिर्ऋषिर्बृहतीच्छन्दो बृहस्पतिर्देवता महा व्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः स्वाहा। ततएतस्मिन्नेवा[३]ग्नौ समावर्तनकर्म्म, पुनः पूर्ववद्व्याहृतिहोमः, ततस्समावर्त्तनकर्म्मणि प्रागग्रेषु

(१) अग्नये स्विष्टकृते इति, एतत्प्रकरणे न प्रत्यनक्त्यवदानस्थानय्याँतयामताया, इति गोभिलोक्तेरैतद्धोमानन्तरं अवदानस्थानमाज्येन न पूरणीयम्। सावित्रहोमे तु पूरणीयमेव एतत्सूत्रानन्तरसूत्रात्। तत्रैव द्रष्टव्यः।
(२) व्याहृतिहोमश्चाज्येन, तत्रापि स्रुवेणैव। महाव्याहृतिभिराज्येनाभिजुहुयात् इति गोभिलसूत्रात्। तथा "होमपात्रमनादेशे द्रवद्द्रव्ये स्रुवः स्मृतः। (३) पुनरग्निस्थापन निवृत्यर्थमेतस्मिन्निति बोध्यम्।

कुशेषूत्तराभिमुख आचार्य्य उपविशेत्, ब्रह्मचारी उत्तराग्रेषु कुशेषु प्राङ्मुख उपविशति । ततो व्रीहियवा-(१)-दि सर्व्वौषधियुताभ्योऽद्भ्योऽनायासेन सचन्दनाभ्यइषदुष्णाभ्योऽञ्जलिमादाय ब्रह्मचारी भूमौ त्यजेदनेन प्रजापतिर्ऋषिरग्न्यादयोदेवताः समावर्त्तने विनियोगः, ओं येऽप्स्वन्तरग्नयः प्रविष्टा गोह्यउपगोह्योमरौकोमनोहाः, खलोविरुजस्तनोदूरिन्द्रियहा अतितानुत्सृजामि। अथापरमञ्जलिं भूमौ त्यजति, प्रजापतिर्ऋषिर्घोरादयोदेवताः समावर्त्तने विनियोगः, ओं यदपां घोरय्यँदपां क्रूरय्यँदपामशान्तमतितदुत्सृजामि। ततस्ताभ्यएवाद्भ्योऽञ्जलिमादायात्मानमभिषिञ्चति, प्रजापतिर्ऋषीरोचनोऽग्निर्देवता समावर्त्तने विनियोगः, ओं योरोचनस्तमिह गृह्णामि तेनाहम्मामभिषिञ्चामि । ततः पुनरप्यञ्जलिमादाय, प्रजापतिर्ऋषीरोचनोऽग्निर्देवता समावर्त्तने विनियोगः, ओं यशसे तेजसे ब्रह्मवर्च्चसाय बलायेन्द्रियाय वीर्य्यायान्नाद्याय

(१) व्रीहयः शालयोमुद्गा गोधूमाः सर्षपास्तिलाः। यवाश्चौषधयः सप्त विपदोघ्नन्ति धारिता इति कर्म्मप्रदीपः। केचिन्मुरामांसीत्याद्यपि।

रायस्पोषाय त्विष्याअपचित्यै, इत्यात्मानमभिषिञ्चति । तथा पुनरप्यञ्जलिमादायाभिषिञ्चत्यनेन, प्रजापतिर्ऋषिः षड्ष्टकामहापङ्क्तिश्छन्दोऽश्विनौ देवते समावर्त्तने विनियोगः, ओं येन स्त्रियमकृणुतय्यँनापामृशतं सुराम् येनाक्षानभ्यषिञ्चतय्येँनेमाम्पृथिवीम्महीम् । यद्वान्यदश्विनायशस्तेन मामभिषिञ्चतम् । ततः पुनरप्यञ्जलिं गृहीत्वा तूष्णीमेव चतुर्थवारमात्मानमभिषिञ्चति । तत आचार्य्यसमीपादुत्थाय सूर्य्यमुपतिष्ठेतानेन । प्रजापतिर्ऋषिः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः, ओं उद्यन् भ्राजभृष्टिभिरिन्द्रोमरुद्भिरस्थात्प्रातर्य्यावभिरस्थात्, दशसनिरसिदशसनिम्माकुर्व्वात्वाविशाम्यामाविश ॥ प्रजापतिर्ऋषिः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः, ओं उद्यन्–भ्राजभृष्टिभिरिन्द्रोमरुद्भिरस्थात्सान्तपनेभिरस्थात् शतसनिरसि शत सनिम्माकुर्व्वा त्वा विशाम्यामाविश ॥ प्रजापतिर्ऋषिः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः, ओं उद्यन्भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात सायय्यावभिरस्थात् सहस्रसनिरसि सहस्रसनिम्मा

कुर्व्वात्वा विशाम्यामाविश । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः, ओं चक्षुरसि चक्षुष्टमस्यव मे पाप्मानञ्जहि सोमस्त्वा राजाऽवतु नमस्तेऽस्तु मामाहिंसीः । ततोमेखलामधस्तादवतारयेदनेन । शुनः शेफऋषिस्त्रिष्टुप्छन्दो वरुणोदेवता मेखलामोक्षणे विनियोगः, ओं उदुत्तमव्वँरुणपाशमस्मदवाधमाव्विँमध्यमं श्रथाय, अथादित्यव्रतेवयन्तवानागसो अदितये स्याम । तदन्वाचार्य्योब्रह्मचारिणोदण्डकाष्ठमजिनञ्चापनीय व्याहृतिहोमं कुर्य्यात् । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्द्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्द्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सवितादेवता व्याहृतिहोमे विनियोगः, ओं स्वःस्वाहा । प्रजापतिर्ऋषिर्बृहतीच्छन्दोबृहस्पतिर्द्देवता महाव्याहृतिहोमे विनियोगः, ओं भुर्भुवः स्वः स्वाहा । ततो ब्रह्मचारी ब्राह्मणान्भोजयित्वा स्वयं च दधितिलान्वा

भुक्त्वाऽऽचम्य शिखाव(१)र्ज्जं केशनखलोमानि वापयेत् । ततो नूतनघटाम्बुना स्नातोऽलंकृतोऽहते वाससी उष्णीषं च परिधायाऽऽचम्य 'यज्ञोपवीतमसीति' मन्त्रेण यज्ञोपवीतद्वयं च परिदध्यात् । ततः स्रजमादाय, प्रजापतिर्ऋषिः श्रीर्देवता स्रग्बन्धने विनियोगः, ओं श्रीरसि मयि रमस्व, इति पुष्पमालाम्बध्नाति । तत उपानहौ परिदधात्यनेन, प्रजापतिर्ऋषिरुपानहौ देवतोपानत्परिधाने विनियोगः, ओं नेत्र्यौस्थोनयतम्माम् । पादुके माणवकस्तूष्णीं परिधत्ते । ततोवंशदण्डं गृह्णात्यनेन, प्रजापतिर्ऋषिर्दण्डोदेवता दण्डग्रहणे विनियोगः, ओं गन्धर्वोऽस्यु पावउपमामव । ततश्छत्रममन्त्रकं गृह्णाति । ततः परिषत्सहितमाचार्य्यमुपगम्य वीक्षेत,

(१) शिखावर्ज्जमिति ! अत्र च असामर्थ्यादिकस्मिन्नेव दिने, उपनयनसमावर्त्तनेति, संस्कारद्वयविधातॄणामाधुनिक सामगानां सशिखमेव वापनम् 'उपनयने तथैव विधानात् । न च, कुशलो कारयस्ति, इति सूत्राद्वपनं कारयन्तीत्येवायाति, अत्रापि शिखावर्ज्जं वपनम्भवतु । तन्न तथा च, शुभकर्म्मनिर्णये । 'एते लूनशिखास्तस्य कोमलैर्हस्तकुड्मलैः ॥ कुश काशाविराजन्ते वटवः सामगाइव, इति विष्णुपुराण पर्य्यालोचनेनात्र वपने शिखा न धार्य्या । यत्तु, अत्र पद्धतौ 'शिखावर्ज्जमिति' लिखितं तच्चोपनयनदिनातिरिक्तदिने समावर्त्तनकरणे बोध्यम् । 'समावर्त्तने शिखावर्ज्जमिति' । विशेषोपदेशाच्चे ति ॥

प्रजापतिर्ऋषिराचार्य्यपरिषदौ देवते आचार्य्यतत्परिषद्वीक्षणे विनियोगः, ओं यक्षमिव चक्षुषः प्रियोवोभूयासम् । तत आचार्य्यसमीपएवोपविश्य मुखघ्राणादीन् प्रसारिताङ्गुलिना करेण स्पृशेत । प्रजापतिर्ऋषिरनुष्टुप्छन्दोजिह्वादेवता मुखपिधाने विनियोगः, ओं ओष्ठापिधानानकुलीदन्तपरिमितः पविः जिह्वेमाविह्वलोवाचञ्चारुमाद्येहवादय । ततआचार्य्योमधुपर्क्कादिना तमर्चयेत् । ततोरथसमीपं गत्वा पक्षसीकूवरं बाहुं वाऽभिपृशेदनेन, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो रथोदेवतारथाभिमर्षणे विनियोगः ओं वनस्पते विड्वङ्गोहि भूयाअस्मत्सखाप्रतरणः सुवीरः गोभिः सन्नद्धो असि वीड़यस्व । ततश्चतुर्थ पादेन रथमाक्रम्योपविशति, ओं आस्थातातेजयतु जेत्वानि । ततः प्राङ्मुखउदङ्मुखोवा गत्वा प्रदक्षिणम्प्रतिनिवृत्याचार्य्यसमीपङ्गच्छति । ततो माणवकआचार्य्याय परिषद्ब्राह्मणेभ्यश्च, ओं अहम्भो ३ अभिवादये, इत्यभिवादनं कुर्य्यात्, तेऽपि प्रत्यभिवादनं कुर्य्युः, ओं आयुष्मान्भव सौम्य, इति । तत आचार्य्यः सकलकर्म्म साधारणं

प्रायश्चित्तरूपं शाट्यायनहोमं कुर्य्यात, तत्र प्रयोगः ॥ ओं अद्यामुकमासीयामुकपक्षीयामुकतिथावमुकगोत्रस्यामुकशर्म्मणोऽमुककर्म्मणि समयाद्यतिक्रमोपजातवैगुण्यसमाधानार्थं शाट्यायनहोममहं करिष्ये । तदर्थं व्याहृतिहोमः । प्रजापतिर्ऋषिर्गायत्रीछन्दोऽग्निर्देवता व्याहृतिहोमे विनियोगः, ओं भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिकूछन्दोवायुर्देवता व्याहृतिहोमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सविता देवता व्याहृतिहोमे विनियोगः, ओं स्वः स्वाहा । प्रजापतिर्ऋषिर्बृहतीच्छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः, ओं भूर्भुवः स्वः स्वाहा । ततः, प्रजापतिर्ऋषिरग्निर्देवता प्रायश्चित्त होमे विनियोगः, ओं पाहिनो अग्नएनसे स्वाहा । प्रजापतिर्ऋषिर्व्विश्वेदेवादेवताः प्रायश्चित्तहोमे विनियोगः, ओं पाहिनोविश्ववेदसे स्वाहा । प्रजापतिर्ऋषिर्व्विभावसुर्देवता प्रायश्चित्तहोमे विनियोगः, ओं यज्ञम्पाहिविभावसो स्वाहा । प्रजापतिर्ऋषिः शतक्रतुर्देवता प्रायश्चित्तहोमे विनियोगः, ओं सर्व्वम्पाहि शतक्रतो

स्वाहा । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः, ओं पुनरूर्ज्जानिवर्त्तस्व पुनरग्न इषायुषः पुनर्न्नः पाह्यंहसः स्वाहा । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता प्रायश्चित्त होमे विनियोगः, ओं सहरय्यानिवर्त्तस्वाग्नेपिन्वस्वधारया विस्वप्स्न्या विश्वतस्परि स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः, ओं आज्ञातय्यँदनाज्ञातय्यँज्ञस्य क्रियते मिथु अग्ने तदस्य कल्पय त्वं हि वेत्थ यथायथं स्वाहा । प्रजापतिर्ऋषिः पंक्तिश्छन्दः प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः, ओं प्रजापतेनत्वदेतान्यन्योविश्वाजातानि परिता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्यामपतयोरयीणां स्वाहा । ओं सूर्य्याय स्वाहा । ओं सोमाय स्वाहा । ओं कुजाय स्वाहा । ओं बुधाय स्वाहा । ओं बृहस्पतये स्वाहा । ओं शुक्राय स्वाहा । ओं शनैश्चराय स्वाहा । ओं राहवे स्वाहा । ओं केतुभ्यः स्वाहा । इति नवग्रहहोमः । पुनर्व्याहृतिहोमः । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता व्याहृति होमे

विनियोगः, ओं भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक्छन्दोवायुर्द्देवता व्याहृति होमे विनियोगः, ओं भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप्छन्दः सवितादेवता व्याहृतिहोमे विनियोगः, ओं स्वः स्वाहा । प्रजापतिर्ऋषिर्ब्बृहतीच्छन्दो बृहस्पतिर्द्देवता महाव्याहृति होमे विनियोगः, ओं भूर्भुवःस्वः स्वाहा । इति शाट्यायनहोमः ॥ ततः प्रादेशमितां घृताक्तां समिधमग्नौ तूष्णीं क्षिपेत् । अथाग्नेः पुनः पर्य्युक्षणादि कुर्य्यात, प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सवितादेवताऽग्निपर्य्युक्षणे विनियोगः, ओं देवसवितः प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय दिव्योगन्धर्व्वः केतपूः केतन्नः पुनातु वाचस्पतिर्व्वाचन्नः स्वदतु । इति होमीयद्रव्यसहितस्याग्नेर्व्वारिधारया वेष्टनम् । प्रजापतिर्ऋषिरदितिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अदिते अन्वमंस्थाः, इति दक्षिणतः । प्रजापतिर्ऋषिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः, ओं अनुमते अन्वमंस्थाः, इति पश्चात । प्रजापतिर्ऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने विनियोगः, ओं सरस्वत्यन्व-

मंस्थाः । इत्युत्तरतः पूर्व्वविपरीताम्वारिधारान्दद्यात । ततो दर्भजूटिकाम्बद्ध्वा प्रजापतिर्ऋषिर्व्वयोदेवता दर्भतृणाभ्यञ्जने विनियोगः, ओं अक्तंरिहाणाव्यन्तुवयः, इत्यग्रमध्यमूलक्रमेण त्रिर्घृताक्तां कृत्वा जलेनाभ्युक्ष्याग्नौ त्यजेदनेन, प्रजापतिर्ऋषिरनुष्टुप्छन्दो रुद्रोदेवतादर्भजूटिका होमे विनियोगः, ओं यः पशूनामधिपतीरुद्रस्तन्तिचरोवृषा पशूनस्माकम्माहिंसीरेतदस्तु हुतन्तव स्वाहा । ततः पूर्णा(१)हुतिः, प्रजापतिर्ऋषिर्विराड्गायत्रीच्छन्द इन्द्रोदेवता यशस्कामस्य

(१) पूर्णाहुति प्रकारोयथा । शौनकः । अथ पूर्णाहुतिन्दद्याद्गन्धपुष्पफलान्विताम् । साक्षतामूर्द्ध्वकायश्च समपाच्छक्रदिङ्मुखः । इति । ऊर्द्ध्वकायः तिष्ठन् । 'शक्रदिङ्मुखः पूर्व्वाभिमुखः' । एतेन परिभाषाबलादासीनेन होमोऽयं कार्य्य इति परास्तं सकलदेशीयाचार्य्यविरोधाच्च । 'आसीनेन उपविष्टेनेत्यर्थः' ॥ कात्यायनः । ततः पूर्णाहुतिं कृत्वा सर्व्वतन्त्रसमन्विताम् । गान्दद्याद्यज्ञवास्त्वन्ते ब्रह्मणे वाससी तथा ॥ अत्र दक्षिणा च विशेषोपदेशस्थलएव, अन्यथा पूर्णपात्रादिकमेव 'या यत्र परिकीर्त्तितेति' वचनात् ॥ गोभिलीये । पूर्णाहुतिश्च 'मूर्द्धानन्दिव' इत्यभिपातयेदिति । पद्धतौ तु 'पूर्णाहोमय्यंशस' इति मन्त्रेणायं पूर्णाहोम उक्तः मन्त्रलिङ्गात्तदप्यविरुद्धमेवेति दिगिति शुभकर्म्मनिर्णयः ।

यजनीयप्रयोगे विनियोगः, ओं पूर्णहोमय्यँशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरव्वृँणे यशसा भामि लोके स्वाहा, इति फलपुष्पघृतयुतां पूर्णाहुतिं दद्यात् । तत ओं वसुभ्यः स्वाहा, इत्यविच्छिन्नामाज्यधारान्दद्यात् । ततो ब्रह्मदक्षिणा, ओं अद्य कृतैतत्ससावित्रचरुहोम समावर्त्तन होमकर्म्मणि कृताकृतावेक्षकाय ब्रह्मणे इदं पूर्णपात्रं प्रजापतिदैवतं दक्षिणान्तुभ्यमहं सम्प्रददे । ततोऽग्निप्रदक्षिणेन हस्तन्नीत्वा ब्रह्मोत्थापनम् ग्रन्थिविमोकोवा । ततः स्रुवलग्नभस्मना त्र्यायुषकरणम्, ओं त्र्यायुषञ्जमदग्नेः, इति हृदि । ओं कश्यपस्य त्र्यायुषम्, इति दक्षिणबाहुमूले । ओं अगस्त्यस्य त्र्यायुषम्, इति वामबाहुमूले । ओं यद्देवानां त्र्यायुषन्तन्मे अस्तु त्र्यायुषम्, इति शिरसि बिन्दुं कुर्य्यात् । एवं माणवकस्यापि तत्र 'तन्मे' इत्यस्य स्थाने 'तत्ते' इति विशेषः ततः पात्रस्थजलमपनीय पात्रमन्यं जलेनापूर्य्य कर्म्म दक्षिणान्दद्यात्, ओं अद्य कृतैतत् ससावित्रचरुहोम समावर्त्तन होमकर्म्मप्रतिष्ठार्थं गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय

दक्षिणामहन्ददे । ततो वामदेव्यगानम् । कयान इति महावामदेव ऋषिर्ग्गायत्रीच्छन्दइन्द्रोदेवताऽग्निष्टोमादौ द्वितीयपृष्ठे शान्तिकर्म्मणि च विनियोगः, ओं कयानश्चित्रआभुवदूती सदावृधः सखा कयाशचिष्ठयावृता कस्त्वासत्योमदानाम्मंहिष्ठोमत्सदन्धसः दृढाचिदारुजेवसु अभीषुणः सखीनामविताजरितॄणाम् शतम्भवास्यूतये स्वस्तिन इन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनो वृहस्पतिर्द्दधातु, ओं स्वस्तिनोवृहस्पातिर्द्दधातु । ओं प्राजापत्यव्वैँ वामदेव्यम्प्रजापतावेव प्रतिष्ठायोत्तिष्ठन्ति । ओं पशवोवै वामदेव्यम्पशुष्वेव प्रतिष्ठायोत्तिष्ठन्ति । ओं शान्तिर्व्वै वामदेव्यं शान्तावेव प्रतिष्ठायोत्तिष्ठन्ति । ओं अतएतत्कर्म्माच्छिद्रमस्तु । अस्त्विति सर्व्वेषामवधारणम् ॥ इति सप्रक्रियमहावार्त्तिकनैबन्धिकठक्कुरवीरेश्वरविरचिता छन्दोगानामुपनयनपद्धतिः समाप्ता ॥

पण्डितवर–चिरञ्जीवशर्म्म मैथिल शोधिता टिप्पण्यालङ्कृता च ।

हर प्रकार की पुस्तक मिलने का पता—

कन्हैयालाल कृष्णदास,

"श्रीरमेश्वर" यन्त्रालय, दरभंगा.

श्री रमेश्वर प्रेस दरभंगा, में श्री शुकदेव शर्मा द्वारा छपा. नं० ५५५३

इति छन्दोगानां उपनयन पद्धतिः

मूल्यं ॥) आ०